KASHMIR SERIES OF TEXTS AND STUDIES.
No. XXX.

THE TANTRĀLOKA

OF

ABHINAVA-GUPTA.

WITH COMMENTARY
BY

RAJANAKA JAYARATHA.

EDITED WITH NOTES
BY
PAṆḌIT MADHUSŪDAN KAUL, SHÂSTRÎ, M. A., M. O. L.,
SUPERINTENDENT OF THE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E., G. B. E., LL. D.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

Volume III.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1921.

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पादिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३०

तन्त्रालोकः

श्रीमन्महामाहेश्वराचार्यवर्य—श्रीमदभिनवगुप्ताचार्यविरचितः

श्रीमन्महामाहेश्वराचार्य—श्रीजयरथकृतविवेकाभिख्यटीकोपेतः

श्रीभारतधर्ममार्तण्ड-काश्मीरमहाराज-

श्रीप्रतापसिंहवरप्रतिष्ठापिते प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-पण्डित-मधुसूदन-शास्त्रिणा

उद्दिष्टकार्यालयस्थपण्डितसहायेन

संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

संवत् १९७७ ख्रैस्ताब्दः १९२१

काश्मीर-श्रीनगर

Printed by
Vithal Tanaji Modak at The "Tatva-Vivechaka" Press,
No. 3544, Parel Road, New Nagpada, opposite
Richardson & Cruddas Office, Bombay.

and Published by
The Research Department, Jammu and Kashmir State,
Srinagar.

प्रथमपरिशिष्टम् ।

अथ

श्रीतन्त्रालोके चतुर्थपञ्चमाह्निकयोर्मूलश्लोकानामकारा-द्यनुक्रमणिका ।

इति चतुर्थपञ्चमाह्निकयोः प्रथमपरिशिष्टं समाप्तम् ॥

द्वितीयपरिशिष्टम् ।

४–५ माह्निकयोः प्रमाणपद्यानां सूची ।

श्लोकाः	पृ० सं०	ग्रन्थांकः
अंशकं षड्विधं देवि	२२	स्वच्छन्दः
अकृतार्थो नरस्तावत्	१४७	....
अतः परं भवेन्माया	४२	स्वच्छन्दः
अथ ब्रह्म परं शुद्धं	२००	आगमः
अदीक्षितानां पुरतः	७७	....
अदृष्टमण्डलोऽप्येवं	५८	परात्रींशिका
अधर्मं धर्ममिति या	१७०	भगवद्गीता
अधुना श्रोतुमिच्छामि	४४९	त्रि० भै०
अनधिगतविषयं	८९	....
अनया शोध्यमानस्य	४१८	मालिनीविजयः
अनादिमति संसारे	६२	श्रीसर्ववीरः
अनेन लक्षयेद्योगी	१११	मा० वि०
अन्तः कौलो बहिःशैवः	२७–२७८	....
अन्तः संविदि यन्निरूढ	१०४	....
अन्तर्लक्ष्यो बहिर्दृष्टिः	४३५	....
अन्धात्तैमिरिको वरः	३५	....
अम्बुवाहा वहेद्वामा	१४८	....

श्लोकाः	पृ० सं०	ग्रन्थांकः
त्रिकोणमण्डलं पूज्यं	४३०	....
त्रिकोणे देवताः सर्वाः	४३१	....
त्रितयभोक्ता वीरेशः	३६४	शिवसूत्रम्
त्रिप्रत्ययमिदं ज्ञानं	८४	निशाटनम्
दशसप्तविसर्गस्था	१८७	पञ्चशतिकम्
दशावस्थाश्विनोत्यन्तः	४१५	....
दीपादीपमिवोदितम्	२३४	....
दीपो यथा निर्वृतिमभ्युपेतो	३३	....
दृष्टमपि अविमृष्टमदृष्टमेव	३२९	....
देवीपञ्चशताशय	१९४	....
देशबन्धश्चित्तस्य	१००	यो० सूत्रम्
द्वादशारं महाचक्रं	१६१	सार्धशतिकम्
द्वादशारावियोगेन	१८८	आगमः
द्वादशैव स्वराः प्रोक्ता	१५६	....
द्विजमाद्यमजीवकम्	४४६	मालिनी वि०
नक्तं महाभूतलये श्मशाने	१८९	क्रमस्तोत्रम्
न क्वापि गत्वा हित्वा वा	२८७	उत्पलस्तो०
नच युक्तं स्मृतेर्भेदे	४५४	ईश्वरप्र०
न चर्या भोगतः प्रोक्ता	२६९	....

४–९ माह्निकयोः प्रमाणपद्यानां सूची समाप्ता ॥

४–५ माह्निकयोः शुद्धाशुद्धपाठपत्रम्

पृ. सं.	पं. सं.	अशुद्धपाठः	शुद्धपाठः
८	७	प्रसज्येत्	प्रसज्येत
१०	१४	अनावृत्ते	अनावृते
२०	१५	बाधमे	वाधभे
५०	१	पूव	पूर्व
५७	१७	श्रीत्रिंशिका	श्रीत्रिशका.
७२	६	लशणः	लक्षणः
७४	५	मन्त्रणां	मन्त्राणां
७७	२	इतितरां	इत्यतितरां
८५	११	छेद	च्छेद
९१	९	अनुलङ्घ	अनुल्लङ्घ
९५	३	येषां	एषां
१०१	३	शून्व	शून्य
१०९	१	स्वप्न	स्वप्न
११०	६	उक्तोद्धे	उक्ताद्धे
२२२	३	नादत्या	नददित्या
२३२	९	मेय	मेध
२३६	७	द्वेतं	द्वैतं
२३७	१४	प्रात्था	प्राप्त्या
२३८	१	नैराक	नैराका
३००	१	सगत्या	संगत्या
३४९	१६	भावयत्	भावयेत्
३७५	११	तनार	तार
४२१	८	मन्त्रै	मत्त्रै

अथ

श्रीतन्त्रालोके ।

श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते
श्रीराजानकजयरथाचार्यकृतोद्योताभिख्यविवरणोपेते

चतुर्थमाह्निकम् ।

यो दुर्विकल्पविघ्नविध्वंसे सद्विकल्पगणपतिताम् ।
वहति जयताज्जयन्तः स परं परमन्त्रवीर्यात्मा ॥

इदानीं शांभवोपायानन्तरं क्रमप्राप्तं शाक्तोपायं कथयितुमपरार्धेन प्रतिजानीते

अथ शाक्तमुपायमण्डलं
कथयामः परमात्मसंविदे ॥ १ ॥

'उपायमण्डलम्' इति विकल्पसंस्क्रियादीनामानैक्यात् ॥ १ ॥

तत्र प्रथममनुजोद्देशोद्दिष्टां विकल्पसंस्क्रियां तावदभिधातुमुपक्रमते

अनन्तराह्निकोक्तेऽस्मि-
न्स्वभावे पारमेश्वरे ।
प्रविविक्षुर्विकल्पस्य
कुर्यात्संस्कारमञ्जसा ॥ २ ॥

'अस्मिन्स्वभाव' इति निर्विकल्पैकरूपे, तेनास्य शांभवोपाय एव विश्रान्तिः, इत्यावेदितम् । संस्कारमिति—पौनःपुन्येन श्रुतचिन्तादिवशात् अस्फुटत्वादिक्रमेण स्फुटतमत्वाद्यापत्तिपर्यन्तं गुणान्तराधानं, येन निर्विकल्पस्वरूपानुप्रवेशो भवेत् । अञ्जसेति शीघ्रम्, अन्यथा हि विरुद्धविकल्पान्तरोत्पादात् संस्कारस्य प्ररोहो न स्यात् ॥ २ ॥

ननु ज्ञानस्य क्षणिकत्वे सर्वेषामविवादः—तद्विकल्पस्यापि ज्ञानरूपत्वेन क्षणिकत्वात्, उत्पादसमनन्तरमेव अन्तर्हितस्वरूपस्य कथं

नाम संस्कारः प्ररोहमियात्, स हि स्थिरे स्यात्, यथा – तिलादौ सुमनोभिः, तत् कथमेतदुक्तम्? इत्याशङ्क्याह

विकल्पः संस्कृतः सूते
　विकल्पं स्वात्मसंस्कृतम् ।
स्वतुल्यं सोऽपि सोऽप्यन्यं
　सोऽप्यन्यं सदृशात्मकम् ॥ ३ ॥

इह यथा – नीलविकल्पान्नीलविकल्पस्यैव उत्पादो, न पीतविकल्पस्य, तथैव अस्फुटत्वेऽपि स्फुटीभावाय भाव्यमानत्वात् भ्रश्यदस्फुटत्वाद्यापत्तेः आहितसंस्कारो विकल्पः स्वात्मवत् संस्कृतमेव विकल्पान्तरं जनयेत् – कारणानुरूपेणैव हि प्रायः कार्यस्योत्पादो भवेत्, इति भावः । एवं विकल्पान्तरेष्वपि ज्ञेयम् । सोऽपि इति संस्कृताद्विकल्पाज्जातो द्वितीयः, सोऽप्यन्यमिति तृतीयः, पुनः सोऽप्यन्यमिति चतुर्थः । अत्र

पं० १४ एवं विकल्पेत्यारभ्य द्वितीय इत्यन्तः पाठो ग० पुस्तकात्पूरितोऽस्ति ।

स्वतुल्यत्वस्य संबन्धसहिष्णुत्वेऽपि 'सदृशात्मकम्' इत्युक्त्या दूरदूरत्वेऽपि विकल्पमालायाः सादृश्यस्य न काचिद्धानिः, इत्यावेदितम् ॥३॥

ननु एकस्मात् संस्कृताद्विकल्पात् यदि तादृशस्यैव द्वितीयस्योत्पादः तदास्तां, तृतीयादेः पुनरेवमेवोत्पत्तावानर्थक्यं स्यात्, विशेषे वा सादृश्यस्य हानिः? इत्याशङ्क्याह

चतुर्ष्वेव विकल्पेषु
यः संस्कारः क्रमादसौ ।
अस्फुटः स्फुटताभावी
प्रस्फुटन्स्फुटितात्मकः ॥ ४ ॥

स्फुटताभावीति स्फुटनयोग्यः, प्रस्फुटन्निति उद्गच्छत्स्फुटत्वः, स्फुटितात्मक इति सिद्धस्फुटत्वः, क्रमादिति अभ्यासातिशयतारतम्यात्, अत एव अत्र यथायथमतिशयदर्शनात् नानर्थक्यं, नापि सादृश्यस्य हानिः—विसदृशस्य

पं० २ क० ख० पु० दूरतरत्वेऽपीति पाठः ।

प्रत्ययान्तरस्यानुत्पादात्, आद्य एव हि संस्कारो यथायथमभ्यासातिशयात् प्ररोहमुपगत इत्येवमुक्तम् ॥ ४ ॥

न च इयानेव अस्य संस्कारः संभवेत्? इत्याह

ततः स्फुटतरो याव-
दन्ते स्फुटतमो भवेत् ।

तत इति चतुर्भ्योऽनन्तरम् ॥

ननु अभ्यासातिशयतोऽपि अस्फुटत्वादिरूपो विकल्पः कथं शीघ्रमेव स्फुटताभाव्यादिरूपतामेति? इत्याशङ्क्याह

अस्फुटादौ विकल्पे च
भेदोऽप्यस्त्यान्तरालिकः ॥ ५ ॥

भेद इति विशेषः, आन्तरालिक इति मध्यवर्ती, तथाहि अस्फुटस्फुटताभाविनोरन्तराले भ्रश्यदस्फुटत्वः, एवमीषत्प्रस्फुटत्वः अङ्कुरित-

पं० १५ एवमीषदित्यारभ्य स्फुटतरत्व इत्यन्तः पाठो ग० पुस्तकात्पूरितोऽस्ति ।

स्फुटितत्वः आसूत्रितस्फुटतरत्वः उद्गच्छत्स्फुट-
तमत्वश्चेति ॥ ५ ॥

ननु एवं-कृते सति किं स्यात्? इत्याशङ्क्याह

ततः स्फुटतमोदार-
'तादूप्यपरिबृंहिता ।
संविदभ्येति विमला-
मविकल्पस्वरूपताम् ॥ ६ ॥

ततो – यथोक्तात् संस्काराद्धेतोः, स्फुटतमम्, अत एव उदारं – निर्विकल्पकसमानकक्ष्यतया महत्, यत्तादूप्यं – विकल्पकत्वं तेन परिबृंहिता – संस्कारान्तरनिरपेक्षीकृता सती, विकल्परूपा संवित्, विमलां – संकोचकलङ्कापहस्तनेन शुद्धामविकल्पस्वरूपतामभ्येति – पूर्णावि-

पं० ६ क० पु० विमला सद्विकल्पेति पाठः ।

पं० ११ क० ग० पु० संस्कारान्तरनिरपेक्षा सतीति, विमला इति च पाठः ।

पं० १२ ख० पु० कलङ्कापहानेन शुद्धा सविकल्पस्वरूपतामभ्येति पूर्वाविकल्पज्ञानतयेति पाठः ।

कल्पज्ञानमयतया परिस्फुरतीत्यर्थः । अतश्च 'विकल्पमात्रे एव न विश्रान्तव्यम्' इत्यपि अनेन उक्तम्, यदाहुः

'परमार्थविकल्पेऽपि नावलीयेत पण्डितः ।
को हि भेदो विकल्पस्य शुभे वाप्यथ वाशुभे ॥'

इति ॥ ६ ॥

एतदेव प्रकृते योजयति

अतश्च भैरवीयं यत्-
तेजः संवित्स्वभावकम् ।
भूयो भूयो विमृशतां
जायते तत्स्फुटात्मता ॥ ७ ॥

अतो – विकल्पसंविद एव तत्तत्संस्कारबलादविकल्पसंविद्रूपतया परिस्फुरणाद्धेतोः, यद्भैरवीयं ज्ञानक्रियाख्यं संवित्स्वभावं तेजः तद्रूप एव 'अहमिति' भूयो भूयः अस्फुटत्वादिक्रमेण उद्गच्छत्स्फुटतमत्वाद्यापत्तिपर्यन्तेन परामृशतां

पं० १६ ख० पु० पर्यन्तेन पौनः पुन्येनेति पाठः ।

तीव्रतीव्रशक्तिपातवतां महात्मनां, तस्य परामृश्यस्य संविदात्मकस्य भैरवीयस्य तेजसः स्फुटात्मता जायते – शांभवावेशवशेन तत्साक्षात्कारो भवतीत्यर्थः ॥ ७ ॥

ननु संविदः प्रमात्रेकरूपत्वात् परामर्शकत्वमेव युज्यते, न परामृश्यत्वं, तथात्वे हि नीलादिवत् अस्या जाड्यं प्रसज्येत्? इत्याशङ्कां दर्शयति

ननु संवित्परामृष्ट्री
परामर्शमयी स्वतः ।
परामृश्या कथं ताथा-
रूप्यसृष्टौ तु सा जडा ॥ ८ ॥

ताथारूप्येति परामृश्यत्वस्येत्यर्थः ॥ ८ ॥

एतदेव समाधत्ते

उच्यते स्वात्मसंवित्तिः
स्वभावादेव निर्भरा ।

नास्यामपास्यं नाधेयं
किंचिदित्युदितं पुरा ॥ ९ ॥

इह स्वात्मरूपा संवित् तावत् अतिरिक्तस्य अपेक्षणीयस्याभावात् स्वत एव निर्भरा नान्याकाङ्क्षेति, नित्योदितत्वात् अस्यां स्वात्मसंवित्तौ न किंचिदस्फुटत्वादि अपास्यं, नापि स्फुटतमत्वादि आधेयमिति । पुरा—अनुपायाह्निके

'अत्र तावत्क्रियायोगो नाभ्युपायत्वमर्हति ।'

इत्यादिनोक्तम् । यदभिप्रायेणैव अतो बाह्यैरपि

'नापनेयमतः किंचित्प्रक्षेप्तव्यं न किंचन ।
द्रष्टव्यं भूततोद्भूतं भूतदर्शी विमुच्यते ॥'

इत्याद्युक्तम् ॥ ९ ॥

ननु यद्येवं तत् इयान् अस्फुटत्वादिरूपः संविदः कुतस्त्योऽयं स्फारः? इत्याशङ्क्याह

किं तु दुर्घटकारित्वात्-
स्वाच्छन्द्यान्निर्मलादसौ ।

पं० ९ क० पु० इतो बाह्यैरपीति पाठः ।

स्वात्मप्रच्छादनक्रीडा-
पण्डितः परमेश्वरः ॥ १० ॥

किं पुनर्, असौ परमेश्वरः परः प्रकाशः – स्वरूपगोपनात्मकदुर्घटकारित्वलक्षणात् शुद्धात् स्वाच्छन्द्यात् हेतोः, परप्रमात्रेकस्वभावस्यापि स्वात्मनः प्रच्छादनं – ग्राह्यग्राहकाद्युल्लासात्तथात्वेनाभासनं, सैव क्रीडा – प्रतिनियतफलाननुसंधानेन प्रवृत्तिः, तत्र पण्डितः – प्रवीण इत्यर्थः। इयमेव हि तस्य स्वातन्त्र्यरूपा मायाख्या शक्तिः – यदनावृतमपि स्वं रूपमावृतत्वेनैव आभासयति, यतोऽयमियान् ग्राह्यग्राहकाद्यात्मा भेदावभासः ॥ १० ॥

तदाह

अनावृत्ते स्वरूपेऽपि
यदात्माच्छादनं विभोः ।

पं० १० क० पु० स्वस्वरूपमिति पाठः ।

सैव माया यतो भेद
एतावान्विश्ववृत्तिकः ॥ ११ ॥

एवमस्य विश्वरूपतयावभासनमेव द्वैतमुच्यते, यद्वशादयं दुरन्तः संसारबन्धः, तदपासनायैव च अयं परामर्शो—यत् संविदेव पुनः पुनः परामृश्यमाना स्फुटतामियात् इति ॥ ११ ॥

तदाह

तथाभासनमेवास्य
द्वैतमुक्तं महेशितुः ।
तद्द्वयापासनेनायं
परामर्शोऽभिधीयते ॥ १२ ॥

तद्द्वयापासनेति—कार्यकारणयोरभेदोपचारात् ॥ १२ ॥

ननु इह 'नहि भातमभातं भवति' इति सर्वेषामविवादः, देहनीलादि चेदं भेदेनावभा-

पं० ८ क० पु० तदाभासनेति पाठः ।

सते, तत् कथमुक्तं 'तदपासनेन संविद एव अवभासो भवेत्'? इत्याशङ्कामपाकर्तुं विकल्प-संस्क्रियानन्तर्येण अनुजोद्देशोद्दिष्टं तर्कतत्त्वमवतारयति

दुर्भेदपादपस्यास्य
मूलं कृन्तन्ति कोविदाः ।
धारारूढेन सत्तर्क-
कुठारेणेति निश्चयः ॥ १३ ॥

बन्धैककारणत्वात् दुष्टो योऽसौ ग्राह्यग्राहकाद्यात्मा भेदः, स एव दुरुन्मूल्यत्वात् पादपः, तस्य अस्य अनुभूयमानस्य, कोविदाः प्रत्यभिज्ञातस्वात्मानः, सन्—साक्षात्तत्त्वनिष्ठः, अत एव तर्कान्तरविलक्षणो योऽसौ परां कोटिं प्राप्तस्तर्कः—शुद्धविद्यांशस्पर्शपवित्रिताया बुद्धेरुदीयमानः स्वात्मप्रत्यभिज्ञापनपररूपः, स एव समुत्तेजितधारः कुठारः, तेन मूलम्—अख्या-

पं० १५ क० पु० प्रत्यभिज्ञानरूप इति पाठः ।

तिलक्षणं कारणमेव कृन्तन्ति, यथास्य* पूर्णपरसंविन्मात्रख्यातेः पुनरुत्थानमेव न भवेत्, इत्ययं निर्णयः, स एव हि महात्मनां देहाद्यालोचनेन यथायथमभ्यासातिशयात् विकल्पशुद्धिमादधानः, परां काष्ठामुपागतः सन्, भावनात्मकतां यायात्, येन अस्फुटमपि संविद्रूपं स्फुटतामासादयेत् ॥ १३ ॥

अत आह

तामेनां भावनामाहुः
सर्वकामदुघां बुधाः ।
स्फुटयेद्वस्तु यापेतं
मनोरथपदादपि ॥ १४ ॥

यस्तर्कः, तां भावनामाहुः, इति विधीयमानलिङ्गानुवेधः तर्क एव हि परां काष्ठामुपगतो भावनेत्युच्यते, तदुक्तम्

---

*अस्य पादपरूपकारणस्य, संविन्मात्रख्यातेः हेतोः इत्यन्वयः ।

पं० ३ क० ख० पु० देहाद्यनालोचनेनेति पाठः ।
पं० ५ ख० पु० भावनात्मिकां यां यायादिति पाठः ।
पं० ९ क० पु० तदेतां भावनामिति पाठः ।

'तदेव परमं ज्ञानं भावनामयमिष्यते ।'

इति । अत एव एनामित्यन्वादेशेनास्य कथनं, तस्यां च परिनिष्पन्नायामभीप्सितफलावाप्तिर्भवेत् इत्युक्तं – सर्वकामदुघामिति, तदुक्तम्

'मुहूर्त्तादेव तत्रस्थः समाधिं प्रतिपद्यते ।
तत्रापि च सुनिष्पन्ने फलं प्राप्नोत्यभीप्सितम् ॥'

इति । या भावनैव हि मनोरथादपि अपेतं – स्वतन्त्रविकल्पानामपि अविकल्प्यत्वादगोचरं, वस्तु – पारमार्थिकं परप्रमात्रेकलक्षणं संविद्रूपं, स्फुटयेत् – अविकल्पवृत्त्या साक्षात्कुर्यात्, यन्महिम्ना किं नाम न योगिनः सिध्येत् ॥ १४ ॥

अतश्च 'इदमेव उत्तमं योगस्याङ्गम्' इत्यस्मद्दर्शने उच्यते, इत्याह

श्रीपूर्वशास्त्रे तत्प्रोक्तं
तर्को योगाङ्गमुत्तमम् ।
हेयाद्यालोचनात्तस्मा-
त्तत्र यत्नः प्रशस्यते ॥ १५ ॥

पं० १५ ख० पु० योगाङ्गतोच्यते इति पाठः ।

मार्गे चेतः स्थिरीभूतं
हेयेऽपि विषयेच्छया ।
प्रेर्य तेन नयेत्ताव-
द्यावत्पदमनामयम् ॥ १६ ॥

यद्यपि

'प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥'

इत्यादिनीत्या तर्कस्य प्राणायामादिभिर्योगाङ्गत्वे साम्यं, तथापि हेयाद्यालोचनात् असौ उत्तममन्तरङ्गं योगस्याङ्गं, तर्केण हि 'इदं हेयम्, इदमुपादेयम्' इति विचारयन् योगी झटित्येव तत्त्वज्ञो भवेत्, तदुक्तम्

'ऊहोऽन्तरङ्गं योगस्य तेन चाध्वन्यवस्थितेः ।
साधारणोऽप्यसौ मुक्तेर्भूयसोपकरोति हि ॥'

इति । तथा

पं० १३ क० ख० पु० तेनाध्वन्यव्यवस्थितेरिति पाठः ।
पं० १४ क० पु० असौ मुक्तो भूयसेति पाठः ।

‘स्वसिद्धान्ताविरुद्धेन यस्तर्केण विचारयेत् ।
धर्मज्ञानापवर्गार्थं स तत्त्वं वेद नापरः ॥’

इति, अतश्च—अत्रैव मुख्यया वृत्त्या यतितव्यम् इत्युक्तं ‘तस्मात्तत्र यत्नः प्रशस्यते’ इति, तत्र हि कृतप्रयत्नो योगी सांख्यादिशास्त्रान्तरोदिते हेये मोक्षोपायलक्षणे मार्गे ‘ममेदमेव आकाङ्क्षणीयं तत्त्वम्’ इत्याद्यभिमानोदयात् स्थिरीभूतमपि चेतः, तेन तर्केण प्रेर्य—ततो हेयान्मार्गात् पराङ्मुखीकृत्य, तावन्नयेत्—उपादेये मार्गे विश्रामयेत्, यावत् पदमनामयं—सर्वोत्तीर्णपरप्रकाशात्मतया प्रस्फुरेदित्यर्थः॥१५।१६॥

अत्र च विषमत्वात् स्वयमेव पदचतुष्टयं व्याचष्टे

मार्गोऽत्र मोक्षोपायः स
हेयः शास्त्रान्तरोदितः ।

पं० ८ क० पु० प्रेर्यतया हेयत्वं तन्मार्गस्येति पाठः ।
पं० १० ख० पु० मायोत्तीर्णेति पाठः ।

विषिणोति निबध्नाति
　　येच्छा नियतिसंगतम् ॥ १७ ॥
रागतत्त्वं तयोक्तं यत्
　　तेन तत्रानुरज्यते ।

शास्त्रान्तरोदितस्य मार्गस्य हेयत्वं प्रागेवोपपादितम्, इति नेह पुनरायस्तं 'षिञ् बन्धने' इत्यस्य विपूर्वस्य अचि विषयशब्दः, तेन विषयरूपा बन्धयित्री येयमिच्छा—'इदमेव मे स्यात्' इत्यादिरभिमानविशेषः, तया नियतिसंगतं रागतत्त्वमुक्तं सामान्येन, सर्वविषयमभिलाषमात्रं हि रागतत्त्वस्य रूपं, तदेव नियतविषयतयोद्यत् नियतितत्त्वस्य, इति तद्युक्तं रागतत्त्वमस्य अभिधेयम्, यत्—यस्माद्धेतोः तत्र नियतेः हेये मार्गे तेन रागेण चेतोऽनुर-

पं० २ क० पु० नियतसंगमादिति पाठः ।

पं० ३ क० पु० तथोक्तं तदिति पाठः ।

पं० ९ क० पु० नियतसंगमादिति पाठः ।

पं० १३ क० पु० तत्त्वस्याभिधेयमिति पाठः ।

ज्यते — स्थिरीभवेत् इत्यर्थः । ननु सर्वत्रैव अन्यत्र

'गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः ।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः ॥
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया ।'

इति । तथा

'हेतुशास्त्रं च यल्लोके नित्यानित्यविडम्बकम् ।
वादजल्पवितण्डाभिर्विवदन्ते ह्यनिश्चिताः ॥
हेतुनिष्ठानि वाक्यानि वस्तुशून्यानि सुव्रते ।
ज्ञानयोगविहीनानि देवतारहितानि तु ॥
धर्मार्थकाममोक्षेषु निश्चयो नैव जायते ।
अज्ञानेन निबद्धानि त्वधर्मेण निमित्ततः ॥
निरयं ते प्रयच्छन्ति ये तत्राभिरता जनाः ।'

इत्यादिना भगवतास्य तर्कस्य निन्दां विदधता अधमत्वमवद्योतितम्, यदभिप्रायेणैव तद्वेदकस्य गुरोरपि परिहार्यत्वमुक्तम्, यदुक्तम्

'तार्किकं न गुरुं कुर्यात् .... ।'

पं० १५ क० पु० अधमत्वमेवेति, तद्वदेकस्येति च पाठः ।

इति । तथा

'…………………तार्किके वधबन्धनम् ।'

इति । एतदनुवेधेनैव अभियुक्तैरपि

'वस्तुनिर्णयशून्याभिर्बोधिताभिः परस्परम् ।
अभिमानैकसाराभिर्जिह्रीमस्तर्कबुद्धिभिः ॥'

इत्याद्युक्तम्, तत् कथमस्य इहोत्तमत्वमुक्तम्, एवं हि श्रुतिविरोधः स्यात्, न च उभयत्रापि एकस्यैव प्रामाण्यकारणस्य सद्भावात् एकत्रापि अप्रामाण्यमुद्भावयितुं शक्यम्, इति किमत्र प्रतिपत्तव्यम्? विषयभेदोऽत्र प्रतिपत्तव्यो, येनं सर्वं स्वस्थं स्यात्, द्विविधो हि तर्कः – कश्चिद्धि वस्तुनिर्णयशून्यश्छलादिप्रधानः परपराजयमात्रपर्यवसानो जल्पप्रायः, कश्चित् हेयोपादेयविवेककारितया वस्तुनिर्णयफलः छलादिशून्यो वादप्रायः, तत्राद्यस्य वस्तुनिर्णयशून्यत्वात् गर्हणीयत्वम्, अत एव

पं० ३ क० पु० अनुवेधे चाभियुक्तैरिति पाठः ।

'........................ वस्तुशून्यानि···· ।'

इति । तथा

'........................ निश्चयो नैव जायते ।'

इत्याद्युक्तम्, अत एव तद्वेदकानामपि वस्तुज्ञत्वाभावात् परिहार्यत्वमभिहितम्, यस्तु हेयाद्यालोचनेन वस्तुपरिशुद्धिमादधानो हेयमपहाय उपादेये विश्रामयेत् स परमुत्तमं योगस्याङ्गम्, इति न कश्चिद्दोषः, तत् आस्माकः सत्तर्को, दर्शनान्तरीयस्त्वसत्तर्कः – इति विभागः ॥ १७ ॥

ननु स्वार्थतत्परो लोकः स्वयमेव अनपेक्षितशास्त्रो हेयमपहातुमुपादेयं च उपादातुं प्रवर्तते, नहि बुभुक्षितस्याशने मलिनस्य वा स्नाने शास्त्रमुपयुज्यते, तत्किम् अत्र तर्केण ? इत्याशङ्क्याह

यथा साम्राज्यसंभोगं
दृष्ट्वादृष्ट्वाथबाधमे ॥ १८ ॥

पं० १५ क० पु० दृष्ट्वायोग्यमथाधमे इति पाठः ।

भोगे रज्येत दुर्बुद्धि-
स्तद्वन्मोक्षेऽपि रागतः ।

यथा खलु अज्ञः कश्चन – हेयोपादेयविवेकमजानानः, साम्राज्यसंभोगं सम्यगुपभोगयोग्यतया परिज्ञाय अपरिज्ञाय वा, अधमे – दुर्गतजनोपभोग्ये, भोगे रागतो रज्येत – चिरतरप्ररूढप्राक्संस्कारपरिपाकवशात् आसक्तो भवेत्, तथैव साक्षान्मोक्षमपहाय असन्मोक्षेऽपि, इति वाक्यार्थः, तेन हेयहानाय उपादेयोपादानाय च अवश्यं तर्कस्योपयोगः, इति युक्तमुक्तम् 'तर्को योगाङ्गमुत्तमम्' इति ॥ १८ ॥

ननु स्वभावत एवायं सर्वो जनस्तत्तद्दर्शनासक्तः स्यात् यदभिप्रायेण

पं० ५ ख० पु० परिज्ञाय परिज्ञाय इति, क० पु० तया परिज्ञाय अधमे भोगे रज्यते दुर्गतजनोपभोगे रागताश्चिरप्ररूढे इति एवं-विधः पाठः ।

पं० ७ क० पु० संस्कारवशादितीयान् पाठः ।

'रिक्तस्य जन्तोर्जातस्य कार्याकार्यमपश्यतः ।
विलब्धा वत केनामी सिद्धान्तविषमग्रहाः ॥'

इत्यादि अन्यत्रोक्तं, तत् तदुचित एव मोक्षोऽपि अस्य भवेत्, इति कोऽयं रागो नाम? इत्याशङ्क्याह

स एवांशक इत्युक्तः
स्वभावाख्यः स तु स्फुटम् ॥ १९ ॥
सिद्ध्यङ्गमिति मोक्षाय
प्रत्यूह इति कोविदाः ।

स–राग एव हि 'स्वभावाख्योऽंशक' इत्यागमेषूक्तम्, तथाहि श्रीस्वच्छन्दशास्त्रे

'अंशकं षड्विधं देवि कथयाम्यनुपूर्वशः ।'

इत्युपक्रम्य

'भावांशकः स्वभावाख्यः पुष्पपातांश एव च ।'

इत्युद्दिश्य

पं० १ क० ख० पु० कार्याकार्यमजानत इति पाठः ।
पं० २ क० ख० पु० विषयाग्रहा इति पाठः ।
पं० १४ क० पु० पुण्यपातांश इति पाठः ।

‘स्वभावश्च भवेच्चेष्टा कथयाम्यनुपूर्वशः ।
ब्रह्मांशो वेदभक्तस्तु रुद्रांशं च निबोध मे ॥
रुद्रभक्तः सुशीलश्च शिवशास्त्ररतः सदा ।’

इत्यादिना असौ लक्षितः । ननु यद्येवं तत् सर्वोऽयं जनः स्वभाववशादेव स्वोचितं मोक्षमासादयेत्, इति को नाम अस्य हेयोपादेयविभागः? इत्याशङ्क्याह ‘स तु’ इत्यादि, स — एवं-विधः स्वभावः पुनः स्फुटम्

‘पौरुषं चैव सांख्यानाम्…………… ।’

इत्याद्यागमप्रमाणसिद्धत्वेन अपरिम्लानतया तत्तत्त्वोचितभोगात्मिकायाः सिद्धेरङ्गमपि

‘स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ।’ (यो० सू० ३–५१)

इत्याद्युक्तिवन्मोक्तुं विघ्न इत्यागमज्ञाः, एवंस्वभावो हि तत्तत्त्वावाप्तिलक्षणां सिद्धिमेव मु-

---

पं० ६ ख० पु० नाम तस्येति पाठः ।

पं० ९ ख० पु० पुरुषमिति पाठान्तरं च ।

पं० ११ क पु० तद्धत्त्वोचितेति पाठः ।

क्तिमभिमन्यते, इति मुक्त्याभासरूपायां हेयायां तस्यामेव विश्रान्तः ॥ १९ ॥

एवमेवंस्वभावत्वादेव साक्षान्मोक्षोपायमपहाय अन्यत्रासक्तो भवेत्, इत्याह

शिवशासनमाहात्म्यं
विदन्नप्ययत एव हि ॥ २० ॥
वैष्णवाद्येषु रज्येत
मूढो रागेण रञ्जितः ।

ननु असौ साक्षान्मोक्षोपायतया शिवशासनस्य प्रभावातिशयं चेज्जानीते किमित्यन्यत्र आसक्तो भवेत्? इत्याशङ्क्याह

यतस्तावति सा तस्य
वामाख्या शक्तिरैश्वरी ॥ २१ ॥
पाञ्चरात्रिकवैरिञ्च-
सौगतादेर्विजृम्भते ।

पं० १० क० ग० पु० किमन्यत्र आसक्त इति पाठः ।

तावतीति – तत्तन्नियतसिद्धिमात्रप्रदे, वामाख्येति

'वामा संसारवमनात्......................'

इत्याद्युक्त्या संसाराविर्भाविका तिरोधानशक्तिरित्यर्थः, वैरिञ्चाः – ब्रह्मवादिनः ॥ २१ ॥

ननु शिवशासनमाहात्म्यमजानन् चेदन्यत्र आसक्तो भवेत् तत् भवतु नाम, को दोषो, जानन् पुनः कथमेवम्? इत्याशङ्क्याह

दृष्टाः साम्राज्यसंभोगं
　　निन्दन्तः केऽपि वालिशाः ॥२२॥
न तु संतोषतः स्वेषु
　　भोगेष्वाशीःप्रवर्तनात् ।

इह खलु केऽपि वालिशप्राया अत्युत्कृष्टतया स्पृहणीयत्वेन परिज्ञायापि साम्राज्यसंभोगं वालिशत्वादेव निन्दन्तो दृष्टाः, न पुनः संतुष्टत्वात्,

---

पं० १५ ख० पु० निन्दतो दुष्टा इति पाठः ।

4

तेषां हि भोगाभिलाषस्य दूरापास्तत्वात् तन्निन्दायामौचित्यमित्याशयः, वालिशानां पुनः संतोषस्तावन्नास्ति, यतः—स्वेषु अधमेषु भोगेष्वपि 'पुनः पुनरेतत् स्यात्'—इत्येवंरूपमाशीर्वादं प्रवर्तयन्ते—भोगाभिलाषस्यानपास्तत्वात्, एवं विदन्तोऽपि शिवशासनमाहात्म्यं मूढाः तन्निन्दामारभमाणा अन्यत्रासक्ता दृश्यन्ते, यद्वशात् तेषां वामाधिष्ठितत्वात् पुनः पुनः संसारे एव निमज्जनं भवेत् ॥ २२ ॥

तदाह

एवंचिद्भैरवावेश-
निन्दातत्परमानसाः ॥ २३ ॥
भवन्त्यतिसुघोराभिः
शक्तिभिः पातिता यतः ।

अतिसुघोराभिरिति

पं० ६ क० पु० एवं वदन्तोऽपीति पाठः ।
पं० ११ ख० पु० एवं चेद्भैरवेति पाठः ।

'विषयेष्वेव संलीनानधोधः पातयन्त्यणून् ।'

इत्यादिलक्षिताभिः घोरतर्यभिधानाभिरपराभिरित्यर्थः ॥ २३ ॥

अत एव च अस्य मूढजनस्य संसारादुन्मज्जनमेव नास्ति, इत्याह

तेन शांभवमाहात्म्यं
जानन्यः शासनान्तरे ॥ २४ ॥
आश्वस्तो नोत्तरीतव्यं
तेन भेदमहार्णवात् ।

आश्वस्तहृदयत्वात् तन्निष्ठो, न पुनः

'अन्तः कौलो बहिः शैवो लोकाचारे तु वैदिकः ।'

इत्यादिनीत्या लोकसंग्रहरक्षापरत्वेन उत्तानतया, इति नास्य संसारार्णवादुत्तारः स्यात्—तदन्तरेव उन्मज्जननिमज्जनानुभवस्याविच्छेदात् ॥ २४ ॥

न च एतदस्माभिः स्वोपज्ञमेवोक्तमित्याह

श्रीकामिकायां प्रोक्तं च
पाशप्रकरणे स्फुटम् ॥ २५ ॥

तदेव पठति

वेदसांख्यपुराणज्ञाः
पाञ्चरात्रपरायणाः ।
ये केचिदृषयो धीराः
शास्त्रान्तरपरायणाः ॥ २६ ॥
बौद्धार्हताद्याः सर्वे ते
विद्यारागेण रञ्जिताः ।
मायापाशेन बद्धत्वा-
च्छिवदीक्षां न विन्दते ॥२७॥

धीराः—वेदादिविषय एव स्थिरप्रज्ञाः, शास्त्रान्तरं वेदान्तादि, विद्या च रागश्चेति समाहारे द्वन्द्वः, विद्या चात्र रागशब्दसंनिधेरशुद्धविद्यो-

च्यते, अत एव वेदादिशास्त्रनिष्ठा मायान्तःपातात् तदुत्तीर्णं शैवं ज्ञानं न लभन्ते, इत्युक्तम् 'मायापाशेन बद्धत्वाच्छिवदीक्षां न विन्दते ।' इति ॥ २६ ॥ २७ ॥

पूर्वं च यदस्माभिः श्रीपूर्वशास्त्रीये संवादग्रन्थे विषयेच्छाशब्देन वेदादिशास्त्रान्तरोदिते मोक्षोपाये अभिष्वङ्गप्रदं नियतितत्त्वोपेतं रागतत्त्वं व्याख्यातं, तत् न निर्मूलम्, इत्यभिद्योतयितुम् अत्रत्यमपि रागशब्दं व्याचष्टे

रागशब्देन च प्रोक्तं
रागतत्त्वं नियामकम् ।
मायीये तच्च तं तस्मि-
ञ्छास्त्रे नियमयेदिति ॥ २८ ॥

अत्र च रागशब्देनेति — वक्ष्यमाणेन हेतुना, नियामकं रागतत्त्वमुक्तमिति समन्वयः, निया-

पं० २ ख० पु० शैवज्ञानं ज्ञानेन लभन्ते इति पाठः ।

मकमिति नियत एव कस्मिंश्चिद्विषयेऽभिष्वङ्गदमित्यर्थः, यतस्तद्रागतत्त्वं तस्मिन्नियते मायीये शास्त्रे वेदादौ, तं मूढं जनं नियमयेत् 'इदमेव ममाकाङ्क्षणीयम्' इति संकुचितत्वेनावस्थापयेत्, यद्यपि सामान्येन सर्वविषयाभिलाषमात्रमयत्वं नाम रागतत्त्वस्य स्वरूपं, तथापि नियतविषयोपारोहमन्तरेण तत् नाभिव्यक्तिमियात्, इत्यवश्यमेव तन्नियतितत्त्वमाक्षिपेत्, इति युक्तमुक्तं 'रागतत्त्वं नियामकम्' इति ॥ २८ ॥

ननु प्राप्तेऽपि वैष्णवादिशास्त्रान्तरोदिते मोक्षे किमिति नाम अयं जनः संसारात् नोन्मज्जति? इत्याशङ्क्याह

मोक्षोऽपि वैष्णवादेर्यः
स्वसंकल्पेन भावितः ।
परप्रकृतिसायुज्यं
यद्वाप्यानन्दरूपता ॥ २९ ॥

विशुद्धचित्तमात्रं वा
दीपवत्संततिक्षयः ।
स सवेद्यापवेद्यात्म-
प्रलयाकलतामयः ॥ ३० ॥

यः खलु वैष्णवादीनां मते मोक्षः, सोऽपि अस्मद्दर्शने प्रलयाकलतामयः — इति संबन्धः, तत्र वैष्णवानां 'परप्रकृतिसायुज्यं मोक्षः' तन्मते हि भगवद्वासुदेवाभिधानस्य महाविभूतेश्चेतनाचेतनविधातृत्वात् परप्रकृतिरूपस्य परस्य ब्रह्मणः स्वस्वभावात् क्रमविचित्रतया तथा तथाभावनात् विश्वरूपतयानेकात्मनोऽपि

'एकमेवाद्वितीयं ब्रह्म ।'

इत्यादिश्रुतेः तत्त्वज्ञानाभ्यासात् परिशुद्धसंविद्रूपैकतत्त्वाव्यभिचारात् अनैक्यस्यापारमार्थिकत्वात् उपशान्तविकारग्रन्थेरैक्यात्मावगमो मोक्षः, यत्श्रुतिः

'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।'

इति ।

'.....ततः सर्गो बुद्बुदत्वेनाभिव्यज्यते ।'

इति च । ब्रह्मवादिनाम् 'आनन्दरूपता मोक्षः' तन्मते हि संसारदशायामविद्यावरणवशेन अनुभूयमानस्य आत्मनः

'आत्मा श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।'

इत्यादिश्रुतेः तत्त्वज्ञानाभ्यासादविद्यावरणापगमे निरवधिकनिरतिशयस्वप्रकाशनैसर्गिकानन्दसुन्दरतया संवेदनं मोक्षः यत्श्रुतिः

'विज्ञानमानन्दं ब्रह्म ।'

इति । विज्ञानवादिनां 'विशुद्धचित्तमात्रं मोक्षः' तन्मते हि स्वभावतः प्रभास्वरस्वरूपस्य चित्तसंतानस्यानाद्यविद्याबलात् रागादिभिरागन्तुकैर्मलैरावृतत्वेऽपि नैरात्म्यादिभावनाभ्यासात् तत्तदागन्तुकमलप्रहाणेन आश्रयपरावृत्तिबलाद-

विनश्वरज्योतीरूपस्वस्वरूपसाक्षात्कारो मोक्षः, यदाहुः

'प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मलाः ।
तेषामपाये सर्वार्थं तज्ज्योतिरविनश्वरम् ॥'

इति । वैभाषिकाणां 'दीपवत् संततिक्षयो मोक्षः तन्मते हि क्लेशकर्मादिहेतुसमुत्थं तत्फलरूपं रूपादिस्कन्धपञ्चकम्, इति तदुभयात्मायं संसारः, यदाहुः

'हेतुफले संसारः ।'

इति, मोक्षः पुनर्दीपस्य यथा स्नेहादिकारणक्षयात् पुनरुत्पादायोगात् निरोधः, तथैव नैरात्म्यादिभावनाभ्यासात् क्लेशकर्मादिप्रहाणेन रूपादीनां पञ्चानामपि स्कन्धानाम् इति, यदाहुः

'दीपो यथा निर्वृतिमभ्युपेतो
नैवावनिं गच्छति नान्तरिक्षम् ।
देशं न कंचिद्विदिशं न कांचित्
स्नेहक्षयात्केवलमेति शान्तिम् ॥

पं० १८ ख० पु० क्लेशक्षयादिति पाठः ।

योगी तथा निर्वृतिमभ्युपेतो
नैवावनिं गच्छति नान्तरिक्षम् ।
देशं न कंचिद्विदिशं न कांचित्
क्लेशक्षयात्केवलमेति शान्तिम् ॥'

इति। प्रलयाकलानां 'सवेद्यापवेद्यात्मेति' विशेषणोपादाने च अयमभिप्रायः—अत्राद्ये पक्षद्वये ब्रह्मण आनन्दमयत्वात् स्वात्मपरामर्शकतया सवेद्यप्रलयाकलप्रायत्वम्, इतरत्र पुनरेकस्य नित्यस्य कस्यचिद्वेदकस्य अनभ्युपगमात् अपवेद्यप्रलयाकलप्रायत्वम्, पक्षचतुष्टयस्य अस्य पक्षान्तरोपलक्षणत्वात् अक्षपादमतादावात्मनः सर्वगुणोच्छेदात्मनि अपवर्गेऽपि अपवेद्यप्रलयाकलप्रायत्वमेवावसेयम्, प्रलयाकलानां च मलद्वयावशेषात् संसारकारणस्याप्रक्षयात् संसारित्वमेव, इति—एतत्प्रायस्य मोक्षस्यापि हेयत्वमुक्तम्, एवं च व्यर्थ एव तैस्तत्तत्तत्त्वप्रलयात्

पं० ८ ख० पु० अवेद्यप्रलयाकलेति पाठः ।

पं० १३ क० पु० मलवत्त्वाविशेषादिति पाठः ।

स्वारसिक्यामपि प्रलयाकलतायां यत्नः कृतः इति भावः, अत एव 'स्वसंकल्पेन भावितः' इत्यनेन च अस्य पक्षचतुष्टयस्य काल्पनिकत्वात् अवास्तवत्वं प्रकाशितम् ॥ २९ ॥ ३० ॥

ननु इह 'बन्धप्रक्षयो नाम मोक्षः' स च

'…………अन्धात्तैमिरिको वरः ।'

इतिन्यायेन त्रिमलबद्धं सकलमपेक्ष्य द्विमलबद्धस्य प्रलयाकलस्य वृत्तः — इति किमिति नामास्य तत्प्रायस्यापि मोक्षस्य एकान्ततो हेयत्वम्? इत्याशङ्क्याह

तं प्राप्यापि चिरं कालं
तद्भोगाभोगभुक्ततः ।
तत्तत्त्वप्रलयान्ते तु
तदूर्ध्वां सृष्टिमागतः ॥ ३१ ॥
मन्त्रत्वमेति संबोधा-
दनन्तेशेन कल्पितात् ।

पं० १२ क० पु० भोगभुक्तित इति पाठः ।

वैष्णवादिः खलु अयं जनः, तं – प्रलयाकलप्रायं मोक्षं चिरं कालमासाद्यापि प्रलयाकलसंबन्धिमोहादिरूपभोगाभोगभुक् सन्, समनन्तरं तस्य प्रलयाकलभोगभूमेर्मायादेस्तत्त्वस्य प्रलयान्ते, पुनः सृष्टिप्रारम्भे

'…………प्रबुध्यन्ते मन्त्रत्वाय भवाय ।'

इत्यादिनीत्या आयातशक्तिपातत्वे सति अनन्तेशेन कृतात् ज्ञानक्रियोत्तेजनलक्षणात् संबोधात्, तदूर्ध्वां – मायोपरिवर्तिनीं शुद्धां सृष्टिं प्राप्तः सन् मन्त्रत्वमेति, अन्यथा पुनः संसारित्वम् – इति सिद्धम्, अत एव प्राप्तायामपि वैष्णवादिदर्शनान्तरोक्तायां मुक्तौ संसारस्य प्रक्षयो न जायते, इति तत्र हेयत्वमुक्तम् ॥३१-॥

ननु समानेऽपि प्रलयाकलत्वे केषांचिन्मन्त्रत्वं केषांचित् संसारित्वम्, इत्यत्र किं निमित्तम्? इत्याशङ्क्याह

एतच्चाग्रे तनिष्याम-
इत्यास्तां तावदत्र तत् ॥ ३२ ॥

अग्र इति – नवमाह्निकादौ, यद्वक्ष्यति

'एतत्कार्ममलं प्रोक्तं येन साकं लयाकलाः ।
स्युर्गुहागहनान्तःस्थाः सुप्ता इव सरीसृपाः ॥
ततः प्रबुद्धसंस्कारास्ते यथोचितभागिनः ।
ब्रह्मादिस्थावरान्तेऽस्मिन्संसरन्ति पुनः पुनः ॥
ये पुनः कर्मसंस्कारहान्यै प्रारब्धभावनाः ।
भावनापरिनिष्पत्तिमप्राप्य प्रलयं गताः ॥
महान्तं ते तथान्तःस्थभावनापाकसौष्ठवात् ।
मन्त्रत्वं प्रतिपद्यन्ते चित्रं चित्राच्च कर्मतः ॥'

इति । 'इत्यास्ताम्' इति प्रकृते तर्कतत्त्वेऽस्यानुपयोगात् ॥ ३२ ॥

ननु यदि नाम दर्शनान्तरोक्तया मुक्त्या संसारस्य प्रक्षयो न जायते, तत् कस्मादयं वैष्णवादिर्जनस्तत्र अनुरज्यते ? इत्याशङ्क्याह

पं० ८ क० पु० कर्मसंहारहान्यै इति पाठः ।
पं० १० ख० पु० महान्तं तमिति पाठः ।

तेनाज्ञजनताक्लृप्त-
प्रवादैर्यो विडम्बितः ।
असद्गुरौ रूढचित्स
मायापाशेन रञ्जितः ॥ ३३ ॥

यः खलु वैष्णवादिर्जनोऽज्ञजनतया — कपिलादिना उपदेष्टृसमूहेन, कल्पितैः — प्रकृतिपुरुषविवेकादिभिः प्रवादैः मोहितः, स यतस्तेन सकललोकप्रसिद्धेन भगवता परमेश्वरेण, मायापाशेन — वामाख्यया शक्त्या, तत्रैव गाढानुरक्तीकृतः, अत एवासद्गुरौ तत्त्वोपदेष्टरि आचार्यविशेषे रूढचित् — आश्वस्तो, न तु जिज्ञासामात्रवान्, सद्गुरौ पुनराश्वस्तस्य साक्षादेव मोक्षो भवेदित्यर्थसिद्धो व्यतिरेकः, अत एव चानेन तर्कतत्त्वानन्तर्येण अनुजोद्देशोद्दिष्टं तदनुषक्तमेव गुरुसतत्त्वमपि प्रतिपादयितुमुपक्रमः कृतः ॥ ३३ ॥

ननु यद्येवं तर्हि अस्य वैष्णवादेर्वामाधिष्ठितत्वात् सद्गुरावेवाश्वासो न जायते, इति का कथा साक्षान्मोक्षावाप्तौ ? इत्याशङ्क्याह

सोऽपि सत्तर्कयोगेन
 नीयते सद्गुरुं प्रति ।
सत्तर्कः शुद्धविद्यैव
 सा चेच्छा परमेशितुः ॥ ३४ ॥

सोऽपीति — असद्गुरौ रूढचित् वैष्णवादिः, ननु युक्तियुक्ते वस्तुनि तर्केण प्ररोहः क्रियते शिवशक्त्या च सद्गुरुप्राप्तिः, इति सर्वत्रैवोक्तम्

'यत्र रूढिः प्रजायेत युक्तियुक्ते विनिश्चयात् ।
शुद्धविद्याप्रसादोऽसावित्याह भगवाञ्छिवः ॥'

इति, सेति शुद्धविद्या, इच्छेति सद्गुरुप्राप्तिपर्यवसायिनी अनुग्रहरूपा ॥ ३४ ॥

न च एतत् स्वोपज्ञमेवोक्तम्, इत्याह

श्रीपूर्वशास्त्रे तेनोक्तं
 स यियासुः शिवेच्छया ।

पं० ९ ख० पु० न तु युक्तियुक्तो वस्तुन इति पाठः ।

भुक्तिमुक्तिप्रसिद्ध्यर्थं
नीयते सद्गुरुं प्रति ॥ ३५ ॥

सः – रुद्रशक्तिसमाविष्टः, स्वस्वरूपं प्राप्तुमिच्छुः, ज्येष्ठाख्यशक्तिरूपया शिवेच्छया सद्गुरुं प्रति नीयते – सद्गुर्वाभिमुख्येन प्रवर्त्यते, येनास्य भुक्तिमुक्ती सिद्ध्यतः, तेन सत्तर्कशिवशक्त्योरभेदात् यत् सत्तर्केण सद्गुर्वाभिमुख्येन प्रवर्तनं तत् शिवशक्त्यैव, इति सिद्धम् ॥ ३५ ॥

ननु 'सर्वस्य शिवेच्छयैव असद्गुरौ सद्गुरौ वा आभिमुख्यमभिजायते' इत्युक्तं, तत् सद्गुरावेव तदस्तु, किं क्रमेण ? इत्याशङ्क्याह

शक्तिपातस्तु तत्रैष
क्रमिकः संप्रवर्तते ।
स्थित्वा योऽसद्गुरौ शास्त्रा-
न्तरे वा सत्पथं श्रितः ॥ ३६ ॥

शास्त्रान्तरे इति – अर्थादसत्पथे वैष्णवाद्ये,

पं० १४ क० ख० पु० असद्रूपे इति पाठः ।

सत्पथं शैवगुरुशास्त्रलक्षणम्, तत्रेति — असद्गुर्वाद्याश्रयानन्तरं सद्गुर्वाद्याश्रिते ॥ ३६- ॥

ननु अयं लोकश्चेत् सद्रूपमसद्रूपं वा गुरुं शास्त्रं च शक्तिपातवशादाश्रयेत् तदस्तु, को नाम दोषः, तयोरेव पुनरसत्त्वे सत्त्वे वा किं निमित्तम्? इत्याशङ्क्याह

गुरुशास्त्रगते सत्त्वे-
　ऽसत्त्वे चात्र विभेदकम् ।
शक्तिपातस्य वैचित्र्यं
　पुरस्तात्प्रविविच्यते ॥ ३७ ॥

अत्रेति — समनन्तरोक्ते, पुरस्तादिति — शक्तिपाताह्निकादौ, विभेदकं — विशेषे हेतुः, एवं वामाख्यया मायाशक्त्या अधिष्ठिता दर्शनान्तरीया गुर्वाद्याः, ज्येष्ठाशक्त्या पुनरास्माकाः, तेन तच्छक्त्यैवाधिष्ठितोऽयं लोकः तत्राश्वस्तः स्यात् ॥ ३७ ॥

पं० ७ ख० पु० सत्त्वासत्त्वे चात्रेति पाठः ।

पं० १२ ख० पु० विशेषणहेतुरिति पाठः ।

न च एतदप्रमाणकम्, इत्याह

उक्तं स्वच्छन्दशास्त्रे तत्
वैष्णवाद्यान्प्रवादिनः ।
सर्वान्भ्रमयते माया
सामोक्षे मोक्षलिप्सया ॥ ३८ ॥

भ्रमयते इति अतस्मिंस्तद्ग्रहात्, तदाह 'अ-मोक्षे मोक्षलिप्सया' इति, अत्र चार्थद्वारेण पाठे अयमाशयो—यत् तत्र बहुधोक्तमिति, तदुक्तं

'अतः परं भवेन्माया सर्वजन्तुविमोहिनी ।
निर्वैरपरिपन्थिन्या यया भ्रमितबुद्धयः ॥
इदं तत्त्वमिदं नेति विवदन्तीह वादिनः ।
सत्पथं तु परित्यज्य नयति द्रुतमुत्पथम् ॥
गुरुदेवाग्निशास्त्रस्य ये न भक्ता नराधमाः ।
असद्युक्तिविचारज्ञाः शुष्कतर्कावलम्बिनः ॥
भ्रमयत्येव तान्माया ह्यमोक्षे मोक्षलिप्सया ।'

इति । तथा

पं० ३ क० पु० वैष्णवाद्यान्प्रमादिन इति पाठः ।

'सांख्यवेदपुराणज्ञा अन्यशास्त्रविनिश्चये ।
न तांल्लङ्घयितुं शक्ता यदान्ये मोक्षवादिनः ॥
क्लिश्यन्ते मायया भ्रान्ता अमोक्षे मोक्षलिप्सया ।'

इति ॥ ३८ ॥

ननु यदि वैष्णवादिरयं जनो मायया भ्रमितः तत् तस्य तत्रैव संस्कारप्ररोहात् असन्मार्गादवरोहो न स्यात्, इत्यस्य कदाचिदपि सन्मार्गारोहो न भवेत्? इत्याशङ्क्याह

यस्तु रूढोऽपि तत्रोद्य-
त्परामर्शविशारदः ।
स शुद्धविद्यामाहात्म्या-
च्छक्तिपातपवित्रितः ॥ ३९ ॥
आरोहत्येव सन्मार्गं
प्रत्यूहपरिवर्जितः ।

यः पुनस्तत्र वैष्णवादौ संस्कारदार्ढ्यात् जातप्ररोहोऽपि उद्यन्योऽसौ सत्तर्कात्मा परामर्शः तेन विशारदः – सारेतरविभागकुशलः, अत

एव स सत्तर्कात्मशुद्धविद्यामाहात्म्यात् ज्येष्ठा-
शक्त्यधिष्ठानपवित्रीभूतः सन् निर्विघ्नमेव सन्मा-
र्गमारोहति – अस्मद्दर्शननिष्ठो भवेत्, येनास्य
साक्षात् मोक्षः स्यात् ॥ ३९- ॥

ननु अस्य परामर्शोदये किं निमित्तम्?
इत्याशङ्क्याह

स तावत्कस्यचित्तर्कः
स्वत एव प्रवर्तते ॥ ४० ॥
स च सांसिद्धिकः शास्त्रे
प्रोक्तः स्वप्रत्ययात्मकः ।

स्वत एव – लोकप्रसिद्धगुरूपदेशादिनिमि-
त्तानपेक्षं, न तु सर्वसर्विकया निर्निमित्तमेव, व-
स्तुतः पारमेश्वरशक्तिपातादेर्निमित्तान्तरस्यापि
संभवात्, अत एव चास्य यौगिकमपि नाम
अस्मद्दर्शनेऽभिहितम्, इत्याह 'स च' इत्यादि

पं० ११ क० पु० निमित्तान्तरानपेक्षमिति पाठः ।

स इति—स्वयं प्रवृत्ततर्कः, सांसिद्धिक इति—तर्केण स संसिद्ध्या जन्मनागत इत्यर्थः, उक्तं च

'गुरुशास्त्रानपेक्षं च यस्यैतत्स्वयमुद्भवेत् ।
स सांसिद्धिक इत्युक्तस्तत्त्वनिष्ठो महामुनिः ॥'

इति । अत एव स्व आत्मीयो, न तु गुर्वादिपरापेक्षः, इदमेवेति सुनिश्चितं ज्ञानमात्मा स्वभावो यस्य स तथोक्तः ॥ ४०- ॥

ननु अन्यत्र परतत्त्वाधिगमे गुर्वाद्यन्यदपि कारणतयोक्तम्, इह पुनः कथं स्वत एव इति 'एकमेव' इत्याशङ्क्याह

किरणायां यदप्युक्तं
　गुरुतः शास्त्रतः स्वतः ॥ ४१ ॥
तत्रोत्तरोत्तरं मुख्यं
　पूर्वपूर्व उपायकः ।

यदपि किरणाख्यायां संहितायां मायाधर्मैः शून्यं परं तत्त्वं ज्ञातुम्—

पं० २ क० पु० संसिद्ध्य जन्मतेति पाठः ।

'शून्यमेवं-विधं ज्ञेयं गुरुतः शास्त्रतः स्वतः ।'

इत्यादिना कारणत्रयमुक्तं, तत्र उत्तरोत्तरं मुख्यं विवक्षितं, यथा – गुरुतः शास्त्रं, ततोऽपि स्वपरामर्शः, यतः पूर्वः पूर्वो यथा गुरुः शास्त्रे उपायः, तदपि स्वपरामर्शे । एवम्

'उपादायापि ये हेयास्तानुपायान्प्रचक्षते ।'

इत्याद्युक्तयुक्त्या गुरुशास्त्रयोरुपायत्वादमुख्यत्वम्, इति स्वपरामर्शस्यैव प्राधान्यं, येन अत्रास्यैव उपादानम् ॥ ४१- ॥

तेन यस्य स्वत एव परामर्श उद्भवेत् स एव सर्वत्र अधिकृतः, इत्याह

यस्य स्वतोऽयं सत्तर्कः
सर्वत्रैवाधिकारवान् ॥ ४२ ॥
अभिषिक्तः स्वसंवित्ति-
देवीभिर्दीक्षितश्च सः ।

पं० ३ ख० पु० स्वः परामर्शो यत्रः पूर्वपूर्वोनुत्कृष्टः, यथा गुरुतः शास्त्रमुपायः ततोपि स्वपरामर्श इत्येवं विधः पाठः ।

यस्य स्वतो — गुर्वादिनैरपेक्ष्येण, अयं समनन्तरोक्तः सत्तर्क उदेति, स सर्वत्रैव — योगज्ञानादावधिकारवान्भवेत् ॥ ४२- ॥

ननु

'न चाधिकारिता दीक्षां विना योगेऽस्ति शांकरे ।'

इत्याद्युक्त्या दीक्षादिकमपहाय कथमस्य सर्वत्रैवाधिकारः? इत्याशङ्क्योक्तं 'स्वसंवित्तिदेवीभिर्दीक्षितोऽभिषिक्तश्चेति — स्वा आत्मीया याः संवित्तय इन्द्रियवृत्तयः ता एव

'बहिर्मुखस्य मन्त्रस्य वृत्तयो याः प्रकीर्तिताः ।
ता एवान्तर्मुखस्यास्य शक्तयः परिकीर्तिताः ॥'

इत्याद्युक्त्या प्रमात्रैकात्म्यमभिद्योतयन्त्यो देव्यः, ताभिर्ज्ञानक्रियोत्तेजनेन सर्वत्रैव स्वातन्त्र्यमापादितः, इत्यर्थः ॥ ४२- ॥

अतश्च स एव परमुत्कृष्ट इत्याह

स एव सर्वाचार्याणां
　　मध्ये मुख्यः प्रकीर्तितः ॥ ४३ ॥

तत्संनिधाने नान्येषु
कल्पितेष्वधिकारिता ॥

सर्वाचार्याणां वक्ष्यमाणानामकल्पितकल्पकादीनां मुख्यत्वादेव च तत्संनिधावन्येषां न परानुग्रहादावधिकारः, इत्युक्तं 'तत्संनिधाने न' इत्यादि, यद्वक्ष्यति

'यथा भेदेनादिसिद्धाच्छिवान्मुक्तशिवा ह्यधः ।
तथा सांसिद्धिकज्ञानादाहृतज्ञानिनोऽधमाः ॥
तत्संनिधौ नाधिकारस्तेषां मुक्तशिवात्मवत् ।
किन्तु तूष्णींस्थितिर्यद्वा कृत्यं तदनुवर्तनम् ॥'

इति ॥ ४३- ॥

ननु गुरुतः शास्त्राधिगमः — इत्यत्र सर्वेषामविवादः, तद्यस्य गुरुरेव नास्ति तस्य शास्त्राधिगमे का वार्ता? इत्ययं स्वयं प्रवृत्ततर्कोऽपि दीक्षाद्यारभमाणः

'शास्त्रहीने न सिद्धिः स्याद्दीक्षादौ वीरवन्दिते ।'

पं० १४ ख० पु० स्वप्रवर्तिततर्क इति पाठः ।

इत्याद्युक्त्या कां नाम सिद्धिमासादयेत्? इत्याशङ्क्याह

स समस्तं च शास्त्रार्थं
सत्तर्कादेव मन्यते ॥ ४४ ॥

मन्यते, इत्यवबुध्यते ॥ ४४- ॥

ननु गुर्वादिनैरपेक्ष्येण कथमेतावतैव समस्तशास्त्रावबोधो भवेत्? इत्याशङ्क्याह

शुद्धविद्या हि तन्नास्ति
सत्यं यद्यन्न भासयेत् ।

न च एतद्युक्तिमात्रेणैव सिद्धम्, अपि स्वागमेनापि इत्याह

सर्वशास्त्रार्थवेत्तृत्व-
मकस्माच्चास्य जायते ॥ ४५ ॥

पं० ५ क० पु० मन्यत इत्यारभ्य आशङ्क्याह इत्यन्तः पाठो ग० पुस्तकात्पूरितोऽस्ति ।

पं० १२ ख० पु० सर्वशब्दार्थेति पाठः ।

इति श्रीपूववाक्ये तद्-
अकस्मादिति-शब्दतः ।

तत् – सत्तर्कनिमित्तकं समस्तशास्त्रावबोधलक्षणं वस्तु, 'अकस्मादितिशब्दात्' उक्तमिति संबन्धः ॥

ननु 'अकस्मात् इति' शब्दमात्रादेव कथमेतदुक्तं स्यात्? इत्याशङ्क्याह

लोकाप्रसिद्धो यो हेतुः
सोऽकस्मादिति कथ्यते ॥ ४६ ॥
स चैष परमेशान-
शुद्धविद्याविजृम्भितम् ।

अकस्मादिति हि निर्निमित्तत्वमुच्यते, नचैतद्युज्यते, तथात्वे हि – नित्यसतत्त्वमतत्त्वं वा स्यात् ॥ ४६- ॥

पं० २ क० पु० इति शब्दितम् इति पाठः ।

पं० १३ ख० पु० नित्यं सत्त्वमसत्त्वमिति, ग० पु० नित्यसत्त्वमतत्त्वमिति च पाठः ।

तदत्र केनचित् हेतुना अवश्यभाव्यं, स च न लोकप्रसिद्धो – गुरूपदेशादेः साक्षाददृष्टत्वात्, तेन पारिशेष्याल्लोकाप्रसिद्धः, स चैष फलानुमेयः पारमेश्वरः शुद्धविद्यासमुल्लासो, यद्वशादेव अस्य गुरुशास्त्रानपेक्षं सर्वविषयं प्रातिभं महाज्ञानमुदियात्, यद्वक्ष्यति

'मध्यतीव्रात्पुनः सर्वमज्ञानं विनिवर्तते ।
अयमेव यतो याति बन्धमोक्षतथात्मताम् ॥
तत्प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत् ।'

इति ॥

उपाधिभेदाच्च अस्य नानात्वम्, इत्याह

अस्य भेदाश्च बहवो
　निर्भित्तिः सहभित्तिकः ॥४७॥
सर्वगोऽंशगतः सोऽपि
　मुख्यामुख्यांशनिष्ठितः ।

पं० ९ क० पु० शास्त्राचार्यानपेक्षयेति पाठः ।

भित्तिः परोपजीवित्वं
परा प्रज्ञाथ तत्कृतिः ॥ ४८ ॥

भित्तेर्निष्क्रान्तो निर्भित्तिः, सह भित्त्या वर्तते इति सहभित्तिकः इत्यस्य सांसिद्धिकस्य मुख्यं भेदद्वयं, सहभित्तिकश्च सर्वामेव भित्तिं गतः स्यात् अंशेन वा, इत्युक्तं 'सर्वगोऽंशगतश्च' इति, सोऽपि अंशगतः मुख्यांशनिष्ठितः स्यात् अन्यथा वा, इति सहभित्तिकस्य त्रयो भेदाः, निर्भित्तिना सह अस्य चत्वारः, बहुत्वं च – भित्तेस्तदंशानां च नानात्वात्, अत्र यद्भावाभावाभ्यां भेदोल्लासः तं भित्तिशब्दं व्याचष्टे 'भित्तिः' इत्यादिना, परोपजीवित्वमिति – उपजीव्यमानः परो भित्तिरित्यर्थः, कः परः? इत्याशङ्क्योक्तं 'परः प्रज्ञाथ तत्कृतिः' इति, प्रज्ञा – स्वविमर्शः, तत्कृतिः – तत्तत्कर्माभिधायकं परकृतं शास्त्रम् । ननु अस्य स्वत एव ज्ञानोदयादुपजीव्यमानतया परो नास्ति, इत्यतोऽस्तु नाम

निर्भित्तिकत्वं, को दोषः, सहभित्तिकत्वे पुनरस्य उच्यमाने सांसिद्धिकत्वमेव न स्यात् – परोपजीवित्वेन कल्पितत्वापत्तेः, न च असंभवत्तत्सामान्यः तद्विशेषो नाम, इति कथमस्य सहभित्तिकत्वमुक्तम्? उच्यते – इह खलु स्वत एव सत्तर्कोदयात् खिलीकृतनिखिलबन्धनस्य भैरवीभावपूर्णस्य सांसिद्धिकस्य गुरोः स्वात्मनि कृतकृत्यत्वात् शेषवृत्तौ परानुग्रह एव परं प्रयोजनम्, यदुक्तं प्राक्

'समस्तयन्त्रणातन्त्रत्रोटनाटङ्कधर्मणः ।
नानुग्रहादृते किंचिच्छेषवृत्तौ प्रयोजनम् ॥'

इति । तथा

'स्वं कर्तव्यं किमपि कलयंल्लोक एष प्रयत्ना-
न्नो पारक्यं प्रति घटयते कांचन स्वात्मवृत्तिम् ।
यस्तु ध्वस्ताखिलभवमलो भैरवीभावपूर्णः
कृत्यं तस्य स्फुटमिदमियल्लोककर्तव्यमात्रम् ॥'

इति च । तत्रास्य निर्मलसंविदोऽनुग्राह्यान् प्रति

पं० ३ ख० पु० अकल्पितत्वानुपपत्तेरिति पाठः ।
पं० १४ पारार्थ्यमिति मूलपाठः ।

निरुपकरणमेव अनुग्रहकारित्वम्–इत्यसौ निरनुसंधानदर्शनमात्रेणैव स्वसंवित्संक्रान्तेः स्वसाम्यापादनेनताननुगृह्णाति, यदुक्तं प्राक्

'तं ये पश्यन्ति ताद्रूप्यक्रमेणामलसंविदः।
तेऽपि तद्रूपिणस्तावत्सेवास्यानुग्रहात्मता॥'

इति, यदभिप्रायेणैव परानुग्रहेऽपि परानपेक्षित्वात् 'निर्भित्तिकः' इत्ययमुच्यते। अनिर्मलसंविदः प्रति पुनरस्य सोपकरणमेव अनुग्रहकारित्वम्–इति 'असावित्थं मयायमनुग्राह्यः' इत्याद्यनुसंधानेन अत्र प्रवृत्तेः सर्वमेव बाह्यमुपकरणजातमपेक्षते, येनास्य परानुग्रहः सिद्ध्येत्, यदुक्तं प्राक्

'सोऽपि स्वातन्त्र्यधाम्ना चेदप्यनिर्मलसंविदाम्।
अनुग्रहं चिकीर्षुस्तद्भाविनं विधिमाश्रयेत्॥'

इति।

'तदर्थमेव चास्यापि परमेश्वररूपिणः।
तदभ्युपायशास्त्रादौ श्रवणाध्ययनादरः॥'

इति च। अनिर्मलचित्त्वेऽपि अनुग्राह्याणां वैचित्र्यात् तत्तदाशयानुसारेण उपकरणानामपि आनन्त्यम्—इति तदभिधायकं शास्त्रमपि सर्वेषामेवापेक्षणीयम्, अन्यथा हि परानुग्रहो न सिद्ध्येत्, यदुक्तम्

'चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने ।
व्याधिभेदाद्यथा भेदो भेषजानां महौजसाम् ॥
यथैकं भेषजं ज्ञात्वा न सर्वत्र भिषज्यति ।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत् ॥'

इति । यदभिप्रायेणैवास्य सर्वगतत्वमुक्तम् । कश्चिदपि असावेकमेव नियतं शास्त्रमधिकृत्य तदुचितानेव अनुग्राह्याननुगृह्णाति—इत्यंशगतत्वम् अस्योक्तम्, यद्वक्ष्यति

'कल्पवित्तत्समूहज्ञः शास्त्रवित्संहितार्थवित् ।
सर्वशास्त्रार्थविच्च································ ॥'

इति ।

'यो यत्र शास्त्रे स्वभ्यस्तज्ञानो व्याख्यां चरेत्तु सः ।
नान्यथा·· ॥'

पं० ३ क० ख० पु० सर्वमेवेति पाठः ।

इति च । तत्तच्छास्त्रात्मनामंशानामपि

'वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥'

इत्याद्युक्त्या यथोत्तरं मुख्यत्वम्, इतरेषां चामुख्यत्वम्—इति मुख्यामुख्यरूपत्वमुक्तम् । न च अस्य एवमपि परमुखप्रेक्षित्वात् सांसिद्धिकत्वं खण्ड्यते—स्वात्मनि स्वत एव कृतकृत्यत्वात् परार्थमेतदपेक्षणात्, यदुक्तं प्राक्

'नहि तस्य स्वतन्त्रस्य क्वापि कुत्रापि खण्डना ।
नानिर्मलचितः पुंसोऽनुग्रहस्त्वनुपायकः ॥'

इति, तेनास्य स्वात्मन्यन्यानपेक्षणात् सांसिद्धिकत्वमेव—इति यथोक्तमेव युक्तम्॥४७-४८॥

न च एतत् स्वोपज्ञमेवोक्तम्, इत्याह

अदृष्टमण्डलोऽप्येवं
यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग्भवेन्नित्यं
स योगी स च दीक्षितः ॥४९॥

एवं यो वेत्ति तत्त्वेन
　　तस्य निर्वाणगामिनी ।
दीक्षा भवेदिति प्रोक्तं
　　तच्छ्रीत्रिंशकशासने ॥ ५० ॥

परशक्तिपातानुगृहीतत्वात् गुर्वाद्यनपेक्षणेन, अदृष्टं—बाह्यदीक्षोपकरणोपलक्षणभूतं, मण्डलं—यागादि येन स, तथाविधोऽपि, अत एव तिलाज्याहुतिवर्जिताम्, असंदिग्धां निर्वाणगामिनीं दीक्षां भजमानो, यः कश्चित् एवमेव—स्वत एव तात्त्विकेन रूपेण विशेषानुपादानात् स्वात्मानं वेत्ति, स दीक्षितः—स्वसंवित्तिदेवीभिरेव पाशक्षपणपुरःसरं स्वात्मज्ञानपात्रतामापादितः, अत एव स नित्यं योगी—व्युत्थानकालेऽपि परमेश्वरैकात्म्यवान्, अत एव स सिद्धिभाक्—जीवन्नेव मोक्षलक्षणां सिद्धिं भजमानः—इत्येतत् श्रीत्रिंशिकाशास्त्रे प्रोक्तं—नैतन्निष्प्रमाणकमित्यर्थः । तत्र च

'अदृष्टमण्डलोऽप्येवम्........................ ।'

इत्यादिश्लोकानन्तरम्

'अनेन ज्ञातमात्रेण........................ ।'

इत्यादिग्रन्थान्तरं संभवदपि प्रकृतानुपयोगात् न पठितम्, अदृष्टमण्डलत्वादेव च 'तिलाज्याहुतिवर्जितत्वादि' अवसीयते, इति – तदपि न पठितम् ॥ ४९ ॥ ५० ॥

अस्य च व्यपदेशान्तरमपि अस्ति, इत्याह

अकल्पितो गुरुर्ज्ञेयः
सांसिद्धिक इति स्मृतः ।

य एष गुरुः 'सांसिद्धिकः' इत्यस्मच्छास्त्रे स्मृतः, स आचार्यान्तरेण अनिष्पादितत्वात् 'अकल्पितो' ज्ञेयः – अकल्पितशब्दव्यपदेश्योऽपि भवेदित्यर्थः ।

पं० १२ क० पु० स एष गुरुराचार्येति पाठः ।

एवमकल्पितं गुरुमुक्त्वा तत्संबन्धतया गुर्वन्तरमपि आह

यस्तु तद्रूपभागात्म-
　　भावनातः परं विना ॥ ५१ ॥
शास्त्रवित्स गुरुः शास्त्रे
　　प्रोक्तोऽकल्पितकल्पकः ।

यः पुनः सांसिद्धिकरूपभागपि स्वयमुदिते ज्ञाने तावता पारिपूर्ण्यस्याभावात्

'अहमेव परो हंसः .... ।'

इत्याद्युक्तेरात्मभावनाबलात्, परं गुर्वादिकमनपेक्ष्य शास्त्रवित्, स गुरुर्ज्ञानस्य सांसिद्धिकत्वेनाकल्पितत्वात् आत्मभावनातः शास्त्रवेदनक्रमेण कल्पनाच्च 'अकल्पितकल्पकः' इत्यस्मच्छास्त्रे प्रोक्तः ॥ ५१ ॥

पं० ३ क० पु० तद्रूपभागात्मा भावनेति पाठः ।

पं० १० क० पु० इत्यास्मदुक्तगतेरात्मनो भावेति पाठः ।

सांसिद्धिकवदस्यापि बहवो भेदाः, इत्याह

तस्यापि भेदा उत्कृष्ट-
मध्यमन्दाद्युपायतः ॥ ५२ ॥

उपायः — शक्तिपातः ॥ ५२ ॥

ननु अस्य स्वयं प्रवृत्तज्ञानपारिपूर्ण्याय किमात्मभावनैव निमित्तम्, उतान्यदपि किंचित्? इत्याशङ्क्याह

भावनातोऽथ वा ध्याना-
ज्जपात्स्वप्राद्व्रताद्धुतेः ।
प्राप्नोत्यकल्पितोदार-
मभिषेकं महामतिः ॥ ५३ ॥

अयं खलु महाज्ञानी भावनाद्यनन्तोपायमाहात्म्यात् गुर्वादिना परेणाकृतत्वात् अकल्पितम्, अत एवोदारं — महान्तम्, अभिषेकं प्राप्नोति — शास्त्रज्ञानादावधिकारवान्भवति, इत्यर्थः ॥५३॥

ननु एवं ज्ञानावाप्तौ भावनादिनिमित्तानन्त्ये किं प्रमाणम्? इत्याशङ्क्याह

श्रीमद्वाजसनीये श्री-
वीरे श्रीब्रह्मयामले।
श्रीसिद्धायामिदं धात्रा
प्रोक्तमन्यत्र च स्फुटम् ॥ ५४ ॥

इदमिति—भावनादीनां निमित्तानामानन्त्यम् ॥ ५४ ॥

एवमनेकागमोक्तावपि निदर्शनार्थं प्रथमं श्रीसर्ववीरग्रन्थं पठति

तस्य स्वेच्छाप्रवृत्तत्वात्-
कारणानन्ततेष्यते।
कदाचिद्भक्तियोगेन
कर्मणा विद्ययापि वा ॥ ५५ ॥
ज्ञानधर्मोपदेशेन
मन्त्रैर्वा दीक्षयापि वा।

एवमाद्यैरनेकैश्च
प्रकारैः परमेश्वरः ॥ ५६ ॥
संसारिणोऽनुगृह्णाति
विश्वस्य जगतः पतिः ।

तत्र हि

'अनादिमति संसारे कारणं परमेश्वरः ।
स्वभावेनैव जन्तूनामनुग्रहपरः सदा ॥'

इत्यादिना परमेश्वरस्य स्वस्वातन्त्र्यादेव अनुग्रहकारित्वमुपक्रम्य

'तया बद्धाञ्छिवो जन्तून्स्वेच्छया मोचयत्यतः ।'

इत्यादिना तदेव निर्वाह्य, अनेन ग्रन्थेन भगवतः स्वातन्त्र्येऽपि परानुग्रहे निमित्तान्तरोपलक्षितत्वमुक्तम्, तथाहि – तस्य परमेश्वरस्यैव भगवतः

'इच्छैव कारणं तस्य .... ।'

इत्याद्युक्त्या स्वेच्छाया एवानुग्रहादिप्रवृत्तौ का-

पं० १५ ख० पु० इच्छैव करणमिति पाठः ।
पं० १६ क० पु० स्वेच्छया एवेति पाठः ।

रणत्वेऽपि अनुग्राह्यभेदात् तस्या अपि वैचित्र्यात् कारणानामानन्त्यमुच्यते, वस्तुतस्तु तदतिरेक्य-न्यत् अस्यापेक्षणीयं नास्ति — इति बहुशः प्रागु-क्तम्, तेन निखिलस्य जन्मवतो जन्तुचक्रस्य पालनादियोगात् 'पतिः' परमेश्वरोऽसौ तत्तदा-शयानुसारेण कदाचिद्भक्त्या कदाचिद्योगेन — इत्येवमाद्यैरनेकैः कारणप्रकारैः संसारिणः — सं-कुचितं प्रमातृवर्गमनुगृह्णाति, संकोचापहस्तनेन पूर्णज्ञानरूपतया प्रथयतीत्यर्थः । 'एवमाद्यैः' इत्यनेन तपोजपादेर्ग्रहणम्, एवं — पूर्णज्ञाना-वाप्तावनेके उपायाः संभवन्ति, इति तात्पर्यार्थः ॥ ५५ ॥ ५६ ॥

एवमुपदर्शितेऽपि निमित्तानन्त्यसाधनाय प्र-

पं० २ ख० पु० करणानामानन्त्येति पाठः ।

पं० २ क० पु० तदतिरेक्यानन्त्यस्य अपेक्षणीयमिति पाठः ।

पं० ७ क० पु० अनेकैः कर्मप्रकारैरिति, ख० पु० करणप्रकारैरिति पाठः ।

माणेऽधिकावापं कर्तुं श्रीब्रह्मयामलग्रन्थं पठति

मातृमण्डलसंबोधात्-
संस्कारात्तपसः प्रिये ॥ ५७ ॥
ध्यानाद्योगाज्जपाज्ज्ञाना-
न्मन्त्राराधनतो व्रतात् ।
संप्राप्यं कुलसामान्यं
ज्ञानं कौलिकसिद्धिदम् ॥ ५८ ॥

मातॄणां – चक्षुरादिकरणेश्वरीणां, मण्डलस्य सम्यक् वृत्तिरूपतापरिहारेण शक्तिरूपतया परिज्ञानान्मातृमण्डलकर्तृकात् प्रियमेलापादिक्रमेण संबोधनाद्वा – इत्येवमाद्यैरनन्तैर्निमित्तैः

'.................... कुलमुत्पत्तिगोचरम् ।'

इत्याद्युक्त्या कुले – स्वस्वरूपादतिरेकायमाणतया उत्पत्स्यमाने प्रमातृप्रमेयात्मनि विश्वत्र, सामान्यम् – अनुगामितया वर्तमानम् , अन्यथा

पं० १४ ख० पु० उत्पाद्यमाने इति पाठः ।

हि अस्य भानमेव न भवेदिति भावः, अत एव कुले — आत्मनि भवा, येयं सिद्धिः, तां ददाति — स्वात्ममात्ररूपतया प्रस्फुरत्परप्रमात्रात्म ज्ञानमवश्यं प्राप्यते इत्यर्थः, संस्कारात् — दीक्षादेः ॥ ५७ ॥ ५८ ॥

ननु यद्येवं, तर्हि अकल्पितकल्पकस्य गुरोः भावनादिहेतुजालनिष्ठत्वं नाम मुख्यं लक्षणम्? इत्याशङ्कां ग्रन्थकृदेव स्वयं निराकर्तुमाह

तत्त्वज्ञानात्मकं साध्यं
　　यत्र यत्रैव दृश्यते ।
स एव हि गुरुस्तत्र
　　हेतुजालं प्रकल्प्यताम् ॥ ५९ ॥

यत् खलु स्वात्मलक्षणं सिसाधयिषितं परतत्त्वात्मकं पूर्णं ज्ञानं तदेव नाम यत्र क्वापि दृश्यते स एव अकल्पितकल्पको गुरुर्ज्ञेयो, न पुनर्भावनादिहेतुजालमात्रनिष्ठः, एवं हि

'नावश्यं कारणानि कार्यवन्ति भवन्ति ।'

इतिन्यायेन भावनादौ हेतुजाले कृतप्रयत्नोऽपि कश्चित् कदाचित् पूर्णं ज्ञानं नासादयेत् – इति कथमिव अस्य अकल्पितकल्पकत्वं स्यात्, एवंरूपस्य ज्ञानस्य कादाचित्कत्वात् केनचित् कारणेन भाव्यम्, इत्युक्तं 'तत्र हेतुजालं प्रकल्प्यताम्' इति, तेनेह फलभूतं पूर्णज्ञानवत्त्वमेवास्य मुख्यं लक्षणम् – इति तात्पर्यार्थः ॥५९॥

न च एतदस्मदुपज्ञमेव, इत्यर्थद्वारेण संवादयति

तत्त्वज्ञानादृते नान्य-
लक्षणं ब्रह्मयामले ।

'भावितः सुप्रसन्नात्मा जपहोमरतः सदा ।'

इत्यादि अन्यत् शास्त्रान्तरोक्तं लक्षणमपहाय, तत्त्वज्ञानमेव मुख्यं लक्षणं श्रीब्रह्मयामले गुरोरुक्तम्, इति वाक्यार्थः, यदभिप्रायेणैव

पं० ५ ख० पु० केनचित्प्रकारेण वा भाव्यमिति पाठः ।

'सर्वलक्षणहीनोऽपि ज्ञानवान्गुरुरुत्तमः ।'

इत्यादि अन्यत्रोक्तम् ॥

ननु भावनादौ कृतप्रयत्नस्यापि न किंचित्फलं जायते इत्येतदागमेन विरुध्यते? इत्याशङ्कां गर्भीकृत्य पुनरपि अर्थद्वारेण संवादयति

तत्रैव चोक्तं सेवायां
कृतायामविकल्पतः ॥ ६० ॥
साधकस्य न चेत्सिद्धिः
किं कार्यमिति चोदिते ।
आत्मीयमस्य संज्ञान-
क्रमेण स्वात्मदीक्षणम् ॥ ६१ ॥
सस्फुरत्वप्रसिद्ध्यर्थं
ततः साध्यं प्रसिद्ध्यति ।

तत्र—श्रीब्रह्मयामले एव च—अविकलपतः,

'........................ संशयानो न सिद्ध्यति ।'

इत्याद्युक्त्या, विकल्पः—संशयः, तदभावात्—

स्वपक्षदार्ढ्येन स्वकल्पाम्नातायां लक्षजपादिरूपायां सेवायां कृतायामपि, साधकस्य केनापि वैगुण्येन, तत्फलभूता मनीषितार्थसंपत्तिलक्षणा सिद्धिः, न चेत्स्यात्, तदा किं तेन कार्यम्, इति भगवत्या चोदिते – प्रश्निते सति, आत्मीयम् – आत्मसंबन्धि, सं सम्यक् – संशयविपर्यासरहितम् 'आत्मैवेदं सर्वम्' इत्येवमात्म, यत् ज्ञानं, तस्य क्रमो – यथायथमभ्यासातिशयात् परधाराधिरोहः, तेन सस्फुरत्वप्रसिद्ध्यर्थम्, अर्थात् – जप्यस्य मन्त्रादेः स्वरूपोत्तेजनाय निमित्तान्तरभूतं, स्वात्मनो दीक्षणम् – परसंविद्रूपतया प्रत्यवमर्शनं नाम, भगवतोत्तरमुक्तं, येन सिसाधयिषितं वस्तु साधकस्य प्रसिद्ध्यति – फलपर्यन्तां निष्पत्तिं यायादित्यर्थः ॥६०॥ ६१-॥

अत्रैव तात्पर्यार्थं व्याचष्टे

अनेन स्वात्मविज्ञानं
सस्फुरत्वप्रसाधकम् ॥ ६२ ॥

उक्तं मुख्यतयाचार्यो
　　भवेद्यदि न सस्फुरः ।

अनेन—श्रीब्रह्मयामलग्रन्थेन, साधकस्य स्वात्मीयमेव विज्ञानं जप्यस्य मन्त्रादेः सस्फुरत्वे निमित्तमुक्तं, यदि नाम मुख्यत्वेनाचार्यः परमेश्वरैकात्म्यायोगात् सस्फुरो न स्यात्, तेन सस्फुरे पुनराचार्ये सति तमेव स्वात्मनि दीक्षां कारयेत्, येनास्य मन्त्रोऽपि सस्फुरः स्यात् ॥६२॥

ननु आचार्यः सस्फुरो भवतु अस्फुरो वा, किमनेन नः प्रयोजनं, तमन्तरेण पुनः स्वयमेव दीक्षा न भवेत्, एवं हि आगमविरोध आपतेत्, तदपव्याख्यानमेतत्? इत्याशङ्क्याह

तत्रैव च पुनः श्रीम-
　　द्भक्ताराधनकर्मणि ॥ ६३ ॥
विधिं प्रोक्तं सदा कुर्वन्-
　　मासेनाचार्य उच्यते ।

पक्षेण साधकोऽर्धार्धात्-
पुत्रकः समयी तथा ॥ ६४ ॥

तत्रैव—श्रीब्रह्मयामले, पुनः—समनन्तरोक्त-प्रश्नोत्तरानन्तरं, श्रीमद्रक्तायाः—श्रीचण्डिकाया विधाने, प्रकर्षेण—गुर्वादिनैरपेक्ष्येण, उक्तं विधिं—तन्मन्त्रग्रहणजपध्यानादिरूपं, सदा—प्रत्यहं, साधकः कुर्वन्, मासेन अभिषेकादिपरिहारेण 'आचार्यः' उच्यते—तदुचितमधिकारमारभमाणो न प्रत्यवैतीत्यर्थः। एवं पक्षेण 'साधकः' सार्धेन—दिनसप्तकेन 'पुत्रकः' पादोनेन—दिनचतुष्टयेन 'समयी' इति ॥ ६३ ॥ ६४ ॥

ननु दीक्षामन्तरेण कथं समय्यादिरूपत्वं स्यात्? इत्याशङ्क्याह

दीक्षयेज्जपयोगेन
रक्तादेवी क्रमाद्यतः।
गुरोरलाभे प्रोक्तस्य
विधिमेतं समाचरेत् ॥ ६५ ॥

दीक्षयेदित्यनेन सर्वमेव गुरुकर्तृकं कर्मोपलक्षितम्, यदुक्तम्

‘जुहोति जपति प्रेद्धे सर्वत्रैवात्र चण्डिका ।’

इति । क्रमादिति – समय्यादिरूपात् । ननु यद्येवं तर्हि गुरुप्रशंसाभिधायिनो निखिलस्यैव आगमस्यानर्थक्यमापतेत्? इत्याशङ्क्याह ‘गुरोरलाभे’ इत्यादि, प्रोक्तस्य – अकल्पितकल्पकादेः सस्फारस्य गुरोरलाभे सति, एतं – समनन्तरोक्तं, स्वयमेव मन्त्रग्रहणादिरूपं विधिं समाचरेत् – अनुतिष्ठेत्, अन्यथा पुनराचार्यमेव सर्वं कारयेत्, इति भावः ॥ ६५ ॥

ननु यद्येवं

‘स्वयं गृहीतमन्त्राश्च क्लिश्यन्ते चाल्पबुद्धयः ।’

इत्यादिना पुस्तकाधीतविद्यानां क्लेशभागित्वाद्यात्मा दोषः कस्मादन्यत्रोक्तः? इत्याशङ्क्याह

मते च पुस्तकाद्विद्या-
ध्ययने दोष ईदृशः ।

उक्तो यस्तेन तद्दोषा-
भावेऽसौ न निषिद्धता ॥ ६६ ॥

मते इति – श्रीसिद्धामते, यद्वक्ष्यति

'पुस्तकाधीतविद्याश्चेत्युक्तं सिद्धामते यतः ।'

इति । तेनेति – भगवता, ईदृश इति – समनन्तरोक्तः सस्फुरत्वाभावलक्षणः, पुस्तकावस्थिता हि मन्त्रा निर्वीर्या इति ततो गृहीतानां तेषां, न स्वसिद्धिसाधनाय निजं तेजः प्रस्फुरेत्, इति – पुस्तकाधीतविद्यानां सिद्ध्यभावात् क्लेशमात्रभागित्वमुक्तम्, यद्वक्ष्यति

'लिपिस्थितस्तु यो मन्त्रो निर्वीर्यः सोऽत्र कल्पितः ।
संकेतबलतो नास्य पुस्तकात्प्रथते महः ॥'

इति । स एव चेद्यदा दोषो न स्यात् तदा नायं कश्चिन्निषेधः, 'पुस्तकान्मन्त्रा नाध्येयाः' इति, पुस्तकाधीतानां हि मन्त्राणां समनन्तरोक्तया युक्त्या केषांचन निजं तेजः प्रस्फुरेत्, यद्वक्ष्यति

'ये तु पुस्तकलब्धेऽपि मन्त्रे वीर्यं प्रजानते ।
ते भैरवीयसंस्काराः प्रोक्ताः सांसिद्धिका इति ॥'

इति ॥ ६६ ॥

एतदभिप्रायावेदकं च तत्रत्यमेव ग्रन्थं पठति

मन्त्रद्रव्यादिगुप्तत्वे
　फलं किमिति चोदिते ।
पुस्तकाधीतविद्या ये
　दीक्षासमयवर्जिताः ॥ ६७ ॥
तामसाः परहिंसादि
　वश्यादि च चरन्त्यलम् ।
न च तत्त्वं विदुस्तेन
　दोषभाज इति स्फुटम् ॥ ६८ ॥

इह खलु

'कथितं गोपितं तेभ्यस्तस्माल्लेख्यं न पुस्तके ।
गुरुवक्त्रात्तु लभ्येत अन्यथा न कदाचन ॥'

इति । तथा

'स्वमन्त्ररक्षणं यत्नात्सर्वदा कारयेत्सुधीः ।'

इत्यादि भगवदुक्तं बहुशोऽवधार्य, मन्त्रादीनां पुस्तकाद्यलिखनेन 'गोपने किं प्रयोजनम्'? इति देव्या प्रश्निते, भगवता 'पुस्तकाधीतविद्या' इत्यादिनोत्तरं दत्तं, मन्त्रणां हि पुस्तकादौ लिखने केचन 'दीक्षासमयवर्जिताः' अत एव 'तामसाः' तमो–बौद्धपौंस्नत्वेन द्विप्रकारमज्ञानं, तत्र भवा ज्ञानशून्याः, ततस्तानधीत्य 'परहिंसाद्यर्थं चरन्ति' न पुनस्तत् सिद्ध्येत्, यतस्ते मन्त्रादीनां तत्त्वं न जानते– गुरुमुखाभावत्, ततश्च स्फुटमेव तेषां निरयपातादिदोषभागित्वं स्यात्, यतस्ते पुस्तकाधीतत्वेन मन्त्राणां निर्वीर्यत्वात्, तत्तद्वश्याद्यारभमाणास्तत्सिद्ध्यभावात्, शास्त्रे स्वयं शिथिलितास्थाः सन्तः, परेषामपि तत्र अनादरमुत्पादयन्ति–इति शास्त्रप्रक्रियोत्सादे निमित्तत्वमासादयेयुः ॥ ६७-६८ ॥

अत्रैव वैषम्यात् पदयुगं व्याचष्टे

पूर्वं पदयुगं वाच्य-
मन्योन्यं हेतुहेतुमत् ।

अन्योन्यमिति—यतः पुस्तकाधीतविद्या अतो दीक्षासमयवर्जिताः, यतश्च दीक्षासमयवर्जिताः अतश्च पुस्तकाधीतविद्या इति ॥

एवमकल्पितकल्पकं गुरुमभिधाय कल्पित-मपि अभिधातुमुपक्रमते

यस्तु शास्त्रं विना नैति
शुद्धविद्याख्यसंविदम् ॥ ६९ ॥
गुरोः स शास्त्रमन्विच्छु-
स्तदुक्तं क्रममाचरेत् ।

यः कश्चित् पुनः शास्त्रपरामर्शमन्तरेण सत्त-र्कात्मिकां शुद्धविद्याख्यां संविदं नाभ्येति—यस्य स्वत एव सत्तर्को नोदियात्, स कस्यापि अकल्पितादेर्गुरोः सकाशात् शुश्रूषादिना शास्त्र-

मन्वेष्टुमिच्छुः सन् वृद्धव्यवहाराद्यधिगतं शास्त्रोक्तमेव 'इदं कृत्वा इदं कुर्यात्' इत्येवमात्मकं क्रममाचरेत्, येनास्य गुर्वाराधनक्रमेण शुद्धविद्योदयः स्यादिति ॥ ६९ ॥

तदाह

येन केनाप्युपायेन
गुरुमाराध्य भक्तितः ॥ ७० ॥
तद्दीक्षाक्रमयोगेन
शास्त्रार्थं वेत्त्यसौ ततः ।
अभिषेकं समासाद्य
यो भवेत्स तु कल्पितः ॥७१॥
सन्नप्यशेषपाशौघ-
विनिवर्तनकोविदः ।

इह खलु

'तमाराध्य ततस्तुष्टाद्दीक्षामासाद्य शांकरीम् ।'

इत्यादिशास्त्रोक्तक्रमेण प्रथमं गुरोरेव तावदा-

राधनं कार्यं, तच्च नोपायमन्तरेण भवेत् – इतितराम् तत्स्वीकारे यतितव्यम्, स च नैकः – आराधनीयानामानैक्यात्, कश्चिद्धि शुश्रूषया, कश्चिद्धनेन, कश्चिच्च प्रतिविद्यादिना आराध्यते, इति 'येन केनाप्युपायेन' इति सामान्येनोक्तं – यस्य हि यथाराधनं सिद्ध्यति तस्य तथा कार्यमिति भावः, तच्च न दृष्टवत्कार्यार्थमेव कार्यम्, इत्युक्तं 'भक्तित' इति, आराधिताच्च तस्माद्दीक्षाक्रमसंबन्धो भवेत् – येनास्य शास्त्राधिगमः सिद्ध्येत्, अन्यथा हि शास्त्रश्रवणमात्रेऽपि अधिकारो न स्यात्, तदधिगमे पुनः का नाम संभावनेति भावः, यदुक्तम्

'अदीक्षितानां पुरतो नोच्चरेच्छिवसंहिताम् ।'

इति । तदनन्तरं च

'संहितापारगस्येह सेकः कार्योऽन्यथा नहि ।'

इत्याद्युक्तदृशा 'अभिषेकम्' अर्थात् तस्मादेव गुरोः सम्यक् पूर्णज्ञानादिरूपत्वेनासाद्य, यः स-

पं० १३ ख० पु० नोच्चरेच्छास्त्रपद्धतिमिति पाठः ।

र्वत्रैव परानुग्रहादावधिकृतो भवेत्, स पुनराचार्यान्तरेण निष्पादितत्वात् कल्पितोऽपि सन्, अशेषस्य पाशौघस्य, विशेषेण – निःसंस्कारं, निवर्तने कोविदः – प्रगल्भते इत्यर्थः। अनेन कल्पितत्वेऽपि अस्य फलतः कश्चिदकल्पितान्न विशेषः – इत्यावेदितम्। परमेश्वर एव हि आचार्यमूर्तिमाश्रित्य अशेषपाशौघविनिवर्तनं कुर्यात्, तदुक्तम्

'यस्मान्महेश्वरः साक्षात्कृत्वा मानुषविग्रहम्।
कृपया गुरुरूपेण मग्नाः प्रोद्धरति प्रजाः॥'

इति। तदत्र किं वस्तुतः कल्पिताकल्पितविभागेन इति भावः॥ ७०-७१- ॥

एवमकल्पितत्वेऽपि कस्यचिद्यथा स्वात्मज्ञानपारिपूर्ण्याय भावनादिना कल्पितत्वमपि संभवेदिति 'अकल्पितकल्पकः' उक्तः, तथा कल्पितस्यापि गुर्वाद्यनपेक्षमेव स्वप्रतिभाबलात् क्वचिच्छास्त्रेऽधिगमो जायते – इत्यकल्पितत्वं

भवेत्, इति कल्पिताकल्पिताख्यं गुरुमप्यभिधातुमाह

यो यथाक्रमयोगेन
कस्मिंश्चिच्छास्त्रवस्तुनि ॥ ७२ ॥
आकस्मिकं व्रजेद्बोधं
कल्पिताकल्पितो हि सः ।

यः कश्चित्कल्पितो गुरुः, कस्मिंश्चित् – लोकोत्तरे शास्त्रीये पारमार्थिकप्रमेयरूपे वस्तुनि, आकस्मिकं – गुर्वाद्यनपेक्षमेव, यथाक्रमयोगेन – यथावस्तु, बोधमासादयेत्, स कल्पितत्वेऽपि स्वयमेव बोधप्रवृत्तेरकल्पितः ॥ ७२- ॥

ननु कल्पितस्य गुरोः क्वचिदंशे यद्यकल्पितत्वं भवेत् तावता किम्? इत्याशङ्क्याह

तस्य योऽकल्पितो भागः
स तु श्रेष्ठतमः स्मृतः ॥ ७३ ॥

पं० ४ क० ख० पु० शास्त्रवर्त्मनि इति पाठः ।

उत्कर्षः शुद्धविद्यांश-
तारतम्यकृतो यतः ।

श्रेष्ठतमत्वे शुद्धविद्यातारतम्यकृत उत्कर्षो हेतुः — शुद्धविद्याया एव तरतमभावो हि अकल्पितत्वादौ निमित्तमिति भावः ॥ ७३- ॥

ननु 'कल्पितस्याकल्पितस्य वा गुरोः फले न कश्चिद्विशेष' इति समनन्तरमेवोक्तं, तदकल्पितस्य कल्पितापेक्षया श्रेष्ठतमत्वे किं निमित्तम्? इत्याशङ्क्याह

यथा भेदेनादिसिद्धा-
च्छिवान्मुक्तशिवा ह्यधः ॥ ७४ ॥
तथा सांसिद्धिकज्ञाना-
दाहृतज्ञानिनोऽधमाः ।
तत्संनिधौ नाधिकार-
स्तेषां मुक्तशिवात्मवत् ॥ ७५ ॥

किं तु तूष्णीं-स्थितिर्यद्वा
कृत्यं तदनुवर्तनम् ।

यद्यपि भेदेश्वरवादे

'……………………… परेह शिवसमता ।

इत्याद्युक्तेः अणूनां सर्वज्ञत्वसर्वकर्तृत्वाद्यभिव्यक्तेरविशेषात् 'शिवसाम्यं नाम मुक्तिरिष्यते' तथापि मुक्ताणुभ्योऽस्यास्ति विशेषो — यदयमनादिसिद्ध इति, तेषां पुनः सर्वज्ञत्वादि तदुपाधिकम्, इति यथा सर्वज्ञत्वाद्यविशेषेऽपि तस्मान्मुक्तशिवा न्यूनाः, तथैव अकल्पितादपि गुरोः कल्पितादयः, अस्य हि स्वत एव प्रवृत्तेरनुपाधिकं ज्ञानम्, एषां पुनः परोपाधिकमिति, अत एव यथा पराशिवसंनिधौ मुक्तशिवानां सृष्ट्याद्यधिकारित्वे नाधिकारः, तथैव सांसिद्धिकस्य गुरोः संनिधाने कल्पितादीनां दीक्षादौ, इति युक्तमुक्तम् 'अकल्पितः श्रेष्ठतमः' इति । ननु यद्येवं तत् किं तत्संनिधौ मुक्ताणु-

वत् कल्पितादयोऽपि किंचित् कुर्वन्ति न वा? इत्याशङ्कयोक्तं 'किं तु तूष्णींस्थितिः' इत्यादि ॥ ७४ ॥ ७५- ॥

ननु इह स्वतः प्रवृत्ततर्कस्यापि अकल्पितस्य यन्नाम शास्त्रादिसापेक्षत्वं प्रागुक्तं, तत् किमस्य दूषणमुत भूषणम्? इत्याशङ्कयाह

यस्त्वकल्पितरूपोऽपि
संवाददृढताकृते ॥ ७६ ॥
अन्यतो लब्धसंस्कारः
स साक्षाद्भैरवो गुरुः ।

यः पुनरकल्पितरूपोऽपि गुरुः स्वानुभवमात्रगोचरस्य स्वयंप्रवृत्तस्य ज्ञानस्य परत्रापि तथोपलभ्यमानत्वात्मना संवादनेन 'एवमेतत् नान्यथा' इत्येवं-रूपं दार्ढ्यं कर्तुम्, अन्यतो—गुरुशास्त्रादेः समस्तात्, गुरुतः शास्त्रतो वा व्यस्तात्, प्राप्तातिशयः स स्वात्मनि नैराका-

ङ्गयेण 'साक्षाद्भैरवः' – पूर्णपरसंविदाविष्ट इ-
त्यर्थः ॥ ७६- ॥

ननु कथं संवादमात्रादेव एतत्स्यात्? इत्या-
शङ्क्याह

यतः शास्त्रक्रमात्तज्ज्ञ-
गुरुप्रज्ञानुशीलनात् ॥ ७७ ॥
आत्मप्रत्ययितं ज्ञानं
पूर्णत्वाद्भैरवायते ।

यतः शास्त्राधिगमक्रमेण शास्त्रज्ञगुरुप्रज्ञाया अनुशीलनाच्च 'इत्थमिदं, नानित्थम्' इत्येवंरूपात् पर्यालोचनात् ससंवादं सत् ज्ञानम् आत्मनि संजातप्रत्ययम् 'एवमेवैतत्, नान्यथा' इत्येवंनिश्चयोत्पादात् दार्ढ्यं प्राप्तम्, अत एव नैराकाङ्क्ष्यात् पूर्णं सत् भैरवायते – निराशंसानुत्तरपरज्ञानरूपतया प्रस्फुरति, इत्यर्थः ॥ ७७- ॥

अत एवागमोऽप्येवम्, इत्याह

तेन श्रीकिरणोक्तं यद्-
गुरुतः शास्त्रतः स्वतः ॥७८॥
त्रिप्रत्ययमिदं ज्ञान-
मिति यच्च निशाटने ॥
तत्संघातविपर्यास-
विग्रहैर्भासते तथा ॥ ७९ ॥

त्रिप्रत्ययमिति, यदुक्तं तत्र

'त्रिप्रत्ययमिदं ज्ञानमात्मा शास्त्रं गुरोर्मुखम् ।'

इति, तेनाकल्पितस्यापि गुर्वाद्यपेक्षणेन हेतुना, श्रीकिरणादौ यत् परतत्त्वज्ञाने गुर्वादि कारण-त्रयमुक्तं तत् संघातादिरूपत्वेन, तथा – उक्तेन प्रकारेण, भासते – सर्वस्यैव अनुभवसिद्धतया प्रस्फुरतीत्यर्थः, संघातः – समस्तत्वं, विपर्यासः– उक्तक्रमान्यथाभावः, कस्यचित् स्वतः प्रवृत्तेऽपि ज्ञाने गुरुशास्त्राभ्यां पूर्णता भवेत्, इति भावः,

विग्रहो – व्यस्तत्वं, – कस्यचिद्धि गुर्वादिभिरेकैकेरैव ज्ञानं जायते, इत्याशयः ॥ ७८ ॥ ७९- ॥

ननु यदि नाम परतत्त्वज्ञाने गुर्वादीनां समस्तानामेव कारणत्वं, तत् कथं व्यस्तानामप्युक्तं, व्यस्तत्वेऽपि वा एकस्मादेव कार्यसिद्धेः किमन्येन? इत्याशङ्क्याह

करणस्य विचित्रत्वा-
　द्विचित्रामेव तां छिदम् ।
कर्तुं वासीं च टङ्कं च
　क्रकचं चापि गृह्णते ॥ ८० ॥
तावच्च छेदनं ह्येकं
　तथैवाद्याभिसंधितः ।

तक्षादयो हि करणस्य छिदिक्रियायां साधकतमस्य वास्यादेर्विचित्रत्वात् तथाविधामेव तां छिदं – द्वैधीभावं कर्तुं समस्तमसमस्तं वा तदुपाददते, इति वाक्यार्थः । लोके हि सरले यथा

यथा महति दारुणि वास्यादिभिर्व्यस्तैरवच्छेदः क्रियते वक्रकोटरादौ च समस्तैरित्याशयः। ननु करणवैचित्र्यात् कार्यवैचित्र्ये नास्ति विवादः, तत् वास्यादेः करणस्य भेदाच्छिदिक्रियापि भिन्नभिन्नैव, इति–व्यस्तैः समस्तैर्वा कथमेभिरेकमेव कार्यं क्रियते? इत्याशङ्क्याह 'तावच्च' इत्यादि, तावत्–तत्तद्वास्यादिकरणनिर्वर्त्यमियत् यच्छेदनं तद्ध्येकं, न भिन्नभिन्नं, तथैव चिच्छिदिषात्मन एकस्यैव आद्यस्याभिसंधानस्य भावात्–परामर्शभेदादेव हि परामृश्यभेदो भवेदिति भावः, एवमेकस्यामपि छिदिक्रियायां वास्यादीनां समस्तानां व्यस्तानां च करणत्वे न कश्चिद्दोषः ॥ ८०- ॥

एतदेव प्रकृते योजयति

इत्थमेव मितौ वाच्यं
करणस्य स्वकं वपुः ॥ ८१ ॥

न स्वतन्त्रं स्वतो मानं
　　कुर्यादधिगमं हठात् ।
प्रमात्राश्वासपर्यन्तो
　　यतोऽधिगम उच्यते ॥ ८२ ॥
आश्वासश्च विचित्रोऽसौ
　　शक्तिपातवशात्तथा ।
प्रमितेऽपि प्रमाणाना-
　　मवकाशोऽस्त्यतः स्फुटः ॥ ८३ ॥

करणस्य—गुर्वादेः, स्वकम्—अनन्यसाधारणं, वपुः—स्वरूपं, तर्कज्ञानात्मिकायां मितौ, इत्थम्—उक्तेन व्यस्तसमस्तात्मना प्रकारेणैव वाच्यं, यद्यपि गुर्वादेरेकैकस्यापि तत्त्वाधिगमेऽस्ति साधकतमत्वं, तथापि यावता प्रमातुराकाङ्क्षा विरमेत्, तावदेव एषां व्यस्तानां समस्तानां वा विनियोगः, इत्याकूतम्, अत एव न मानं नाम मानत्वात्स्वतन्त्रम् इत्येव बलात्कारेण प्रमात्रपेक्षां विना अधिगमं विदध्यात्, अधि-

गमो हि नाम 'ज्ञातोऽयं मयार्थः' इत्येवंपर्यवसानः प्रमातुराश्वासः, स एव चेन्नोत्पन्नः को नाम अधिगमार्थः, स च आश्वासः शक्तिपातस्य तीव्रतमत्वादिभेदात् तथा तीव्रतमत्वादिनैव क्रमेण विचित्रो, येन – गुर्वादेर्व्यस्तात् समस्ताद्वा उत्पद्यते इत्याशयः, अत एव बहिः प्रमितेऽपि अर्थे प्रमातुराश्वासानुत्पादात् प्रमाणान्तराणामस्ति निर्बाध उपयोगः ॥ ८१ ॥
॥ ८२-८३- ॥

ननु अर्थालोकादिरूपा सामग्री चेन्न संघटिता, तत् ज्ञानमेव नोत्पद्यते, इति कस्तत्र अधिगमार्थः, अथ चेत् संघटिता, तत् प्रथमाक्षसंनिपात एव प्रत्ययान्तरानपेक्षिणः प्रमातुरनधिगतार्थविषयोऽधिगमः स्यात्, एवमपि उत्तरकालं धारावाहीनि विज्ञानानि तत्र चेत्प्रवर्तन्ते, तत् प्रवर्तन्तां नाम, को दोषः, तेषां पुनस्तत्रैव प्रमाणत्वं न भवेत् – आद्येनैव ज्ञान-

क्षणेन अपूर्वस्यार्थस्य प्रकाशनात्, अपूर्वार्थप्रकाशत्वमेव हि नाम प्रमाणत्वम्, यदाहुः

'अनधिगतविषयं प्रमाणम्, अज्ञातार्थप्रकाशो वा।'

इति, प्रमातुरपि एतावतैव फलवत्त्वं 'ज्ञातोऽयं मयार्थः' इत्येवंसंतोषाभिमानात्, न च एतत् औत्तरकालिकानां धारावाहिनां विज्ञानानां संभवति, इति कथमुक्तं 'प्रमितेऽपि प्रमाणानामवकाशः' इति? इत्याशङ्क्याह

दृष्ट्वा दृष्ट्वा समाश्लिष्य
　　चिरं संचर्व्य चेतसा।
प्रिया यैः परितुष्येत
　　किं ब्रूमः किल तान्प्रति ॥८४॥

दृष्ट्वा दृष्ट्वेति—आभीक्ष्ण्येनाश्लेषसंचर्वणयोरपि असौ अर्थाल्लभ्यते, चिरशब्दाद्वा—तेन रूपज्ञानात्मकैः स्पर्शज्ञानात्मकैस्तत्पृष्ठभाविविकल्पज्ञानात्मकैश्च शतशः प्रवृत्तैः प्रमाणैः प्रमितायां

प्रियायां येषामाश्वासलक्षणः परितोषो जायते, तान् प्रति किं ब्रूमः – प्रमात्राश्वासपर्यन्तस्याधिगमस्य आद्येनैव ज्ञानक्षणेन उत्पादेऽनुभवविरोधान्न किंचित्, इति यावत्, अतश्च

'एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न भागो दृष्टः स्याद्यः प्रमाणैः परीक्ष्यते ॥'

इत्याद्युक्तमयुक्तमेव, इति भावः, तेन

'यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः ।
नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥'

इत्याद्युक्तयुक्त्या पूर्वप्रमाणानधिगतः कश्चिदपूर्व एवांशः प्रमाणान्तरैरवश्यमधिगम्यते, येन पर्यन्ते प्रमातुः समाश्वासोत्पादः स्यात् । यत् पुनरन्यैः

'नैवाधिकपरिच्छेदः प्रमाणैरुत्तरैर्ध्रुवम् ।
धारावाहिषु बोधेषु कोऽधिकोऽर्थः प्रकाशते ॥'

इत्याद्युक्त्या गृहीतग्राहिणामपि धारावाहिनां

पं० ९ ग० पु० सोऽर्थो वावधृत इति, तदपेक्षया पं० १० टीकायामपि प्रमाणाधिगत इति पाठान्तरं च वर्तते ।

विज्ञानानां प्रामाण्यमुक्तं, तन्न युक्तं – व्यर्थत्वादिदूषणशतोपनिपातात्, तस्मादेकस्मिन्नपि अर्थेऽनेकप्रमाणप्रवृत्त्यात्मनि संप्लवेऽपि नाधिगतस्यैव अर्थस्याधिगमः, इति – न प्रमाणान्तराणां निष्प्रयोजनत्वं, तैरपि – अपूर्वस्यार्थस्य प्रकाशनात्, यद्येवं तदौत्तरकालिकानां धारावाहिनां विज्ञानानां स्वारसिक्यां प्रवृत्तावपूर्वार्थप्रकाशो न कदाचिदपि विरमेत्, इत्यनवस्थापि न स्यात् – प्रमात्राश्वासलक्षणस्य अनुलङ्घनीयस्यावधेर्भावात्। एवमपि एकस्मिन्नेवार्थे प्रमातुरनेकैः प्रमाणैः प्रवृत्तैः संभूयापूर्वतया प्रकाशो जायते, – इत्येषां पूर्वापेक्षमुत्तरेषां प्रामाण्यम्, उत्तरापेक्षं च पूर्वेषाम् – इत्यन्योन्याश्रयतापि न स्यात्, अत्रान्योन्यापेक्षस्यैव प्रामाण्यस्याभावात्, अपूर्वार्थप्रकाशाधीनं हि ज्ञानानां प्रामाण्यम्, स चापूर्वार्थविषयः प्रकाशः सर्वेषामेव पृथक्पृथगवस्थितः, इति – को नाम अन्योन्याश्रयताया अवकाशः, संप्लवो हि धर्म्यभिप्रायेणो-

च्यते 'एकस्मिन्नेवार्थेऽनेकप्रमाणप्रवृत्तिः' इति, वस्तुतः पुनरनेकधर्मविशेषिते धर्मिणि केनचित् कश्चिद्धर्मविशेषोऽपूर्वतया प्रकाशते, यद्वशात्–तत्तद्धर्माधिगतिपुरःसरीकारेण पूर्णेन रूपेण धर्मिणमधिगम्य प्रमातुः पर्यन्ते समाश्वासो जायते इति ॥ ८४ ॥

तदेतदाह

इत्थं च मानसंप्लुत्या-
मपि नाधिगते गतिः ।
न व्यर्थता नानवस्था
नान्योन्याश्रयतापि च ॥८५॥

इदानीं तर्कतत्त्वानुषक्तं गुरुसतत्त्वमुपसंहरन् तदानन्तर्येणानुजोद्देशोद्दिष्टं योगाङ्गानुपयोगित्वमपि वक्तुमुपक्रमते

एवं योगाङ्गमियति
तर्क एव न चापरम् ।

अन्तरन्तः परामर्श-
पाटवातिशयाय सः ॥ ८६ ॥

एवमियति—गुरुसतत्त्वात्मनि प्रमेये प्रतिपादिते, तर्क एव उत्तमं योगाङ्गं, न पुनरपरं यमादि किंचित्, इति पर्यवसितम्, यतः स एवान्तरन्तर्—यथायथं संवित्संनिकर्षेण शुद्धविद्यात्मनः परामर्शस्य पाटवातिशयं जनयेत्, येन अन्ते योगिनः परसंवित्साक्षात्कारः स्यात्, तदुक्तं

'लब्धभूमेर्विरक्तस्य तज्जयोपायपेशलः ।
ऊहो नाम वितर्कोक्तिः प्रविचारेक्षणात्मकः ॥
यद्यत्सातिशयं स्थानं भोगेन समधिष्ठितम् ।
विनश्वरेण संदेहमूलेन सुमलीमसम् ॥
किमनेन विकल्पोक्तिव्यवहारात्मना त्वलम् ।
अस्मादन्यद्विशिष्टेन भोगेन परिपूरितम् ॥'

इत्यादि ।

'पदं पदवतां श्रेष्ठं स्वतेजोगूढलोचनम् ।
तदेकं निर्वितर्कं स्यात्प्रभोः स्थानमनातुरम् ॥
शेषाणि सवितर्काणि संत्याज्यानि मुमुक्षुभिः ।
न वितर्कं विना तानि त्यक्तुं योगप्रयोक्तृभिः ॥

पं० १७ ख० पु० अनुत्तरमिति पाठः ।

शक्यन्ते मुनिशार्दूल तस्मात्तर्कोऽपि युज्यते ।
योगिनोऽङ्गत्वमापन्नः स्वोपकाराय चेष्टते ॥'

इत्यन्तम् ॥ ८६- ॥

ननु समानेऽपि योगाङ्गत्वे तर्कस्यैवोत्तमं योगाङ्गत्वं, न पुनर्यमादीनामित्यत्र किं निमित्तम्? इत्याशङ्क्याह

अहिंसा सत्यमस्तेय-
ब्रह्मचर्यापरिग्रहाः ।
इति पञ्च यमाः साक्षा-
त्संवित्तौ नोपयोगिनः ॥ ८७ ॥
तपःप्रभृतयो ये च
नियमा यत्तथासनम् ।
प्राणायामाश्च ये सर्व-
मेतद्बाह्यविजृम्भितम् ॥ ८८ ॥

प्रभृतिना शौचादय उक्ताः, यदुक्तम्

'शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।'

इति, एवमादयः सर्वे संवित्तौ साक्षान्नोपयोगिनः इति संबन्धः, साक्षाद्ग्रहणेन पारम्पर्येण पुनर्येषामुपयोगित्वं भवेदपि नाम—इति सूचितम्, एषां साक्षादनुपयोगित्वे हेतुः—'सर्वमेतद्बाह्यविजृम्भितम्' इति ॥ ८७ ॥ ८८ ॥

न चैतद्युक्तिमात्रेणैव सिद्धं, यावदागमेनापि, इत्याह

श्रीमद्वीरावलौ चोक्तं
　बोधमात्रे शिवात्मके ।
चित्तप्रलयबन्धेन
　प्रलीने शशिभास्करे ॥ ८९ ॥
प्राप्ते च द्वादशे भागे
　जीवादित्ये स्वबोधके ।
मोक्षः स एव कथितः
　प्राणायामो निरर्थकः ॥ ९० ॥

प्राणायामो न कर्तव्यः
शरीरं येन पीड्यते ।
रहस्यं वेत्ति यो यत्र
स मुक्तः स च मोचकः ॥ ९१ ॥

चित्तस्य चेत्यग्रासीकरणक्रमेण चेतयितरि यः प्रलयो – विश्रान्तिः, स एव अनन्यगमनात्मा बन्धः, तेन शशिसहिते भास्करे – प्राणापानप्रवाहे प्रलीने, मध्यधामलयादुच्छिन्नस्ववाहे, अत एव जीवः – उदान एव आदित्यः तत्तत्प्रमेयादिदाह्यवस्तूपादानात् अग्निः, तस्मिन् मध्योर्ध्ववाहक्रमेण द्वादशान्तं प्राप्ते सति – प्रमाणप्रमेयव्यवहारोच्छेदेन प्रमातर्यैव परां काष्ठामधिरूढे, निःश्रेयसात्मपरश्रेयोरूपे स्वबोधके स्वप्रकाशे बोधमात्रे अर्थादुदिते, यः कश्चिदनुभवविशेषः स एव मोक्षः कथितः,

'शशिभास्करसंयोगाज्जीवस्तन्मात्रतां व्रजेत् ।
अत्र ब्रह्मादयो लीना मुक्तये मोक्षकाङ्क्षिणः ॥'

इत्यादिना तत्रैव प्रागुपदिष्टो, न तु दर्शनान्तरवन्निमित्तान्तरसमधिगम्यः, अत एव रेचकादिरूपः प्राणायामो निरर्थकः—तेन न कश्चिन्मोक्षलक्षणोऽर्थः सिद्ध्यति इत्यर्थः । एवं भगवता प्रश्निते भगवतीप्रश्नार्थमेव सिद्धान्तीकर्तुम्

'सत्यमेतन्महाप्राज्ञ प्राणायामो न कारणम् ।'

इत्युपक्रम्य

'प्राणायामो न कर्तव्यः शरीरं येन पीड्यते ।'

इत्यादिना परपक्षे बाधकं प्रमाणमुपन्यस्य स्वपक्षे साधकं प्रमाणं दर्शयति 'रहस्यं वेत्ति यो यत्र' इत्यादि, रहस्यं—प्रमाणाद्यप्रवृत्तेः सर्वजनागोचरं प्रमातृमात्रसतत्त्वं परं तत्त्वं, योऽभिजानाति—साक्षात्कुर्यात्, स स्वयं मुक्तः सन्, अन्येषामपि मोचकः, प्राणायामस्य आनर्थक्याभिधाने यमादीनामपि दण्डापूपीयन्यायेन तत् अर्थसिद्धम्, इति पृथक् नोक्तम्, 'बोधमात्रे शिवात्मके' इत्यनेन पुनः प्राक्

पटलद्वयोक्तमर्थजातं संक्षिप्योपक्षिप्तम् ॥ ८९ ॥
॥ ९० ॥ ९१- ॥

ननु यमादि यदि बाह्यविजृम्भितत्वात् न संवित्तावुपयोगि, तदस्तु, को दोषः, प्रत्याहारादि पुनर्बाह्यात्प्रत्यावृत्तं सत्, अन्तरेव लब्धप्ररोहम्, इति तदपि कथं न तत्रोपयुक्तम्? इत्याशङ्क्याह

प्रत्याहारश्च नामाय-
मर्थेभ्योऽक्षधियां हि यः ।
अनिबद्धस्य बन्धस्य
तदन्तः किल कीलनम् ॥ ९२ ॥
चित्तस्य विषये क्वापि
बन्धनं धारणात्मकम् ।
तत्सदृग्ज्ञानसंतानो
ध्यानमस्तमिता परम् ॥ ९३ ॥

यदा तु ज्ञेयतादात्म्य-
मेव संविदि जायते ।
ग्राह्यग्रहणताद्वैत-
शून्यतेयं समाहितिः ॥ ९४ ॥

अयं हि नाम प्रत्याहारो – यदर्थेभ्यो रूपादिभ्यः प्रत्याहृतानां चक्षुरादीन्द्रियज्ञानानाम् अन्तः कीलनं – चित्तस्वरूपानुकारायमाणतया स्वात्मायत्ततासादनम्, यदुक्तम्

'स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।' (यो० सू० २–५४)

इति, तदेव च अनिबद्धस्य

'संसारोऽस्ति न तत्त्वतस्तनुभृतां बन्धस्य वार्तैव का ।'

इत्यादिन्यायेन अलब्धप्ररोहस्यापि बन्धस्य, कीलनं – दार्ढ्यापादनम् 'परस्या हि संविदः स्वस्वातन्त्र्यात् गृहीतसंकोचाया देशाद्यवच्छिन्नत्वं नाम बन्धः' स एव चात्र कुतश्चित् प्रत्या-

हृतानामिन्द्रियाणां कुत्रचिदवस्थापनादुपोद्बली-कृतः, इति कथं नाम प्रत्याहारादेः संवित्साक्षात्कारायोपयोगः — व्यापिकाया हि संविदः कथं नाम कुत्रचिदेवोपलम्भो भवेत् इति भावः, यदुक्तम्

‘ यत्र यत्र मनो याति तत्र तत्रैव धारयेत् ।
चलित्वा कुत्र गन्तासि सर्वं शिवमयं यतः ॥ ’

इति । एवं धारणादावपि अवसेयम्, तत्र हि कन्दादौ नियत एव देशे ‘चित्तस्य बन्धो रूपम्’ यदुक्तम्

‘ देशबन्धश्चित्तस्य धारणा ।’ (यो० सू० ३–१)

इति । ध्यानेऽपि सजातीयानामेव ज्ञानानां प्रवहद्रूपत्वं नाम रूपं, न विजातीयानाम्, इत्यत्र नियताकारावच्छिन्नत्वम् यदुक्तं

‘ तत्र प्रत्ययैकतानता ध्यानम् ।’ (यो० सू० ३–२)

इति, अत एव ‘अस्तमिता परम्’ इत्युक्तम् । समाधावपि ज्ञानज्ञेयाख्यरूपद्वयतिरस्कारेण ध्ये-

यात्मज्ञेयमात्रप्रतिभास एव रूपम्, इत्यत्र नियत एवाकारोऽवच्छेदकः, यदुक्तम्

'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।' (यो० सू० ३–३)

इति ॥ ९२ ॥ ९३ ॥ ९४ ॥

ननु यमादीनां पञ्चानामपि बहिरङ्गत्वात् यदि संवित्तौ नोपयोगः, तत् तावदास्ताम्

'त्रयमन्तरङ्गं पूर्वेभ्यः ।' (यो० सू० ३–७)

इति तेषां किमिति नाम न तत्रोपयोगः? इत्याशङ्क्याह

तदेषा धारणाध्यान-
समाधित्रितयी पराम् ।
संविदं प्रति नो कंचि-
दुपयोगं समश्नुते ॥ ९५ ॥

'अनिबद्धस्य बन्धस्य तदन्तः किल कीलनम्' इत्याद्युक्त्या बन्धकत्वादेहेंतोः ॥९५॥

ननु यद्येवं तद्यमादीनामष्टानामपि योगाङ्गानां किमर्थमभिधानम्? इत्याशङ्क्याह

योगाङ्गता यमादेस्तु
समाध्यन्तस्य वर्ण्यते ।
स्वपूर्वपूर्वोपायत्वा-
दन्त्यतर्कोपयोगतः ॥ ९६ ॥

अन्त्येति – अन्ते साधुः, अष्टानां यमादीनामङ्गानामुपेयत्वेन योग्य इति, यमा नियमानामुपायो, नियमाश्च आसनस्य – इत्यादिक्रमेण यमादीनामष्टानामपि पूर्वपूर्वोपायत्वेन योगाङ्गत्वं वर्णितम्, यथैषामुपेयरूपत्वात् पार्यन्तिके तर्के द्वारद्वारिभावेनोपयोगः स्यात्, यस्मादष्टाभिरपि एतैरङ्गैरुपस्कृतमतेर्योगिन एवं स्वपरामर्शो जायते, येनास्य झटित्येव स्वसंवित्तिसाक्षात्कारो भवेत्, यन्नाम अत्र योगस्य स्वदर्शनोक्तानि षडङ्गान्यपहाय पातञ्जलीयं यमाद्यङ्गाष्टकमुक्तं, तत्रायमाशयो – यत् क्वचिदपि एत-

दङ्गाष्टकातिरिक्तम् अन्यदङ्गान्तरं नास्ति, इति सर्वत्र तर्कस्यैवाङ्गान्तराण्युपायः, स च स्वसंवित्साक्षात्कारस्येति ॥ ९६ ॥

एतदेवोपपादयति

अन्तः संविदि रूढं हि
तद्द्वारा प्राणदेहयोः ।
बुद्धौ वार्प्यं तदभ्यासा-
न्नैष न्यायस्तु संविदि ॥९७॥

यतः खलु संविदि, अन्तर्–अभेदेन, जातप्ररोहं संवेद्यमानं सत् तद्यमादि, तद्द्वारा–संविन्मुखेनैव, नहि असंविदितं किंचिदपि वस्तु व्यवहारयोग्यं भवेत्, इति भावः, अभ्यासात्–पौनःपुन्येन सेवनात्, देहादावर्प्यं–देहादि यथा शनैः शनैः संस्कारपाटवेन तथैव प्ररोहमियादित्यर्थः, तद्यथा आसनादि देहे, प्राणायामादि प्राणे, प्रत्याहारादि बुद्धाविति । संवि-

दि पुनरेष देहादौ प्ररूढस्य यमादेः तद्वारेण अभ्यासबलात् प्ररोहोत्पादनात् स न्यायो न भवेत्, संविदि हि यमादेः प्ररोहः पटीयस्त्वमुच्यते, स एव च नाम संस्कारः, न च संवित् संस्कार्या, संस्कारो हि अतिशयः, स च नास्यां संभवेत् — असंविद्रूपतापत्तेः, तेन पराद्वयरूपायां नित्योदितायामस्यां यमादेर्न किंचित्प्रयोजनम् — इति तात्पर्यम्, यदुक्तम्

'अन्तः संविदि यन्निरूढमभितस्तत्प्राणधीविग्रहे
संचार्येत कथं तथेति घटते तत्राभ्युपायक्रमः ।
ये त्वभ्यासपथेन संविदमिमां संस्कर्तुमभ्युद्यता-
स्ते किं कुत्र कथं नु वा विदधतामित्यत्र संदिह्महे ॥'

इति ॥ ९७ ॥

अथ वा देहादिद्वारेण संविद्यभिव्यक्तिलक्षणोऽतिशयो भवेत्, इत्याह

अथ वास्मदृशि प्राण-
धीदेहादेरपि स्फुटम् ।

सर्वात्मकत्वात्तत्रस्थो-
ऽप्यभ्यासोऽन्यव्यपोहनम्॥९८॥

यद्वा पराद्वयदर्शने

‘ प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्प्यश्च । ’

इत्यादिनीत्या देहादेरपि संविद्रूपत्वेन सर्वात्मकत्वात्, तत्र प्राणादाववस्थितोऽपि यमादीनामभ्यासः, अन्येषां भेदनिष्ठानामयमादिरूपाणां हिंसादीनामपोहनम्, एवं हि यथात्मनि हिंसा न कार्या, तथा परत्रापि – इति स्वपरयोरात्मरूपतयावभासनेन भेदविगलनात् संविद एवाभिव्यक्तिर्भवेत्, इति भावः ॥ ९८ ॥

ननु यद्यत्र अभ्यस्यते तच्चेत् तत्र संस्कारदार्ढ्यात् पाटवातिशयं यायात्, इत्यस्तु को दोषः, तत् पुनरन्यव्यपोहनमाधातुं कथमुत्सहते – येन कार्यान्तरमपि उत्पद्येत? इत्याशङ्कां शमयितुं दृष्टान्तयति

देह उत्प्लुतिसंपात-
धर्मोज्जिगमिषारसात् ।
उत्प्लाव्यते तद्विपक्ष-
पाताशङ्काव्यपोहनात् ॥९९॥

उत्प्लुतिः—ऊर्ध्वं प्लवनं, तस्याः पौनःपुन्येन संभवात् यः संपातस्तद्धर्मा येयमुद्गन्तुमिच्छा तस्या रसः—पुनःपुनरभ्यासादादरातिशयः ततो हेतोः, यथा देहः तस्योज्जिगमिषारसस्य विपक्षभूतो यस्तिर्यगधश्च पातः तदाशङ्काया व्यपोहनमधिकृत्य, उत्प्लाव्यते—अङ्गश्रमादिनोर्ध्वप्लवने योग्यः क्रियते इत्यर्थः,—तेन ऊर्ध्वं प्लवनाभ्यासेन अधःपातादि देहे व्यपोह्यते—इत्यन्यदभ्यस्यतोऽपि अन्यनिवृत्तिर्भवेदिति भावः ॥ ९९ ॥

पं० ९ क० पु० तदाशङ्कया इति पाठः ।

एतदेव प्रकृते योजयति

गुरुवाक्यपरामर्श-
सदृशे स्वविमर्शने ।
प्रबुद्धे तद्विपक्षाणां
व्युदासः पाठचिन्तने ॥१००॥

एवं शिष्यस्य पाठचिन्तनादौ विषये पुनः पुनरभ्यासातिशयात्, गुरुवाक्यपरामर्शानुगुणे स्वपरामर्शे, उदितस्य स्वपरामर्शस्य, विपक्षभूतानां मौढ्यादीनामपि व्युदासः········॥१००॥

ननु गुरुवाक्यबलादेवास्य मौढ्यादीनामपि व्युदासः सिद्ध्येदिति अन्तर्गडुप्रायेण स्वविमर्शेनापि कोऽर्थः? इत्याशङ्क्याह

नह्यस्य गुरुणा शक्यं
स्वं ज्ञानं शब्द एव वा ।
धियि रोपयितुं तेन
स्वप्रबोधक्रमो ध्रुवम् ॥१०१॥

पं० ८ ख० पु० उचितस्येति पाठः ।

नहि नामास्य शिष्यस्य स्वबलादेव गुरुणा चिन्ताद्यात्म स्वं ज्ञानं, पाठ्यमानो वा स्वः शब्दः तद्बुद्धौ प्ररूढं कर्तुं शक्यं, यावदस्य स्वपरामर्शो न स्यात्, यतः स्वविमर्शं विना हि असौ गुरुवाक्यमवधारयितुमपि नालं, का पुनर्मौढ्यादिनिवृत्तौ संभावनापि भवेत्, तस्मान्निश्चितमेव स्वस्यात्मीयस्य शुद्धविद्यारूपत्वात् प्रकृष्टस्य परामर्शात्मनः बोधस्य क्रमोऽस्तीति शेषः॥१०१॥

यन्माहात्म्यादवधानशालिनां स्वप्नानुभूतमपि वस्तु अर्थक्रियापर्यन्तां साक्षात्काररूपतामेति, इत्याह

अत एव स्वप्नकाले
श्रुते तत्रापि वस्तुनि ।
तादात्म्यभावनायोगो
न फलाय न भण्यते ॥१०२॥

अतः—स्वपरामर्शस्य सद्भावादेव, तत्र अस-

दर्थोपलम्भात्मन्यपि स्वप्नसमये कस्मिंश्चित् श्रुतेऽपि वस्तुनि विषये स्त्र्यादाविव ताद्रूप्येण पुनःपुनरभ्यासात्मा भावनायोगः क्रियमाणः फलाय न न भण्यते — जागरोचितार्थक्रियाकारितया साक्षात्क्रियते इत्यर्थः ॥ १०२ ॥

ननु यद्विषयोऽयं नाम स्वपरामर्श इष्यते, तयोः पाठचिन्तनयोरेव किं स्वरूपम्? इत्याशङ्क्याह

संकेतानादरे शब्द-
 निष्ठमामर्शनं पठिः ।
तदादरे तदर्थस्तु
 चिन्तेति परिचर्च्यताम् ॥१०३॥

संकेतस्य — सांकेतिकस्यार्थस्यानादरः — उपेक्षा, अत एव 'शब्दनिष्ठम्' इत्युक्तं, न पुनरर्थनिष्ठमपि, तदादरे शब्दापेक्षायां शब्दप्रतीतिपुरःसरीकारेण हि अर्थप्रतीतिरिति भावः॥१०३॥

पं० ११ क० पु० तदर्थस्था इति पाठः ।

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति

तदद्वयायां संवित्ता-
वभ्यासोऽनुपयोगवान् ।
केवलं द्वैतमालिन्य-
शङ्कानिर्मूलनाय सः ॥१०४॥

तदिति – उक्तोद्धेतोः, अभ्यास इति यमादीनाम्। ननु यदि नामायमनुपयुक्तः तत्किमर्थमुक्तः? इत्याशङ्क्याह – केवलमित्यादि।१०४।

ननु यद्येवं तत्कथं स्वपरामर्शात्मनस्तर्कस्य द्वैतशङ्कानिर्मूलत्वं प्रागुक्तम्? इत्याशङ्क्याह

द्वैतशङ्काश्च तर्केण
तर्क्यन्त इति वर्णितम् ।
तत्तर्कसाधनायास्तु
यमादेरप्युपायता ॥ १०५ ॥

वर्णितमिति तर्कतत्त्वचर्चावसरे, उक्तं च

'अनेन लक्षयेद्योगी योगसिद्धिप्रवर्तकम् ।
निवर्तकं च यद्वस्तु बहुधा संव्यवस्थितम् ॥'

इति, तस्मात् यमादीनां यद्द्वैतशङ्कानिर्मूलकत्वमुक्तं तत् तर्कोपायत्वात्पारम्पर्येण, इत्येषां तदेव मुख्यतयाभिधानीयम्, इत्याह 'तत्तर्केत्यादि' तेन तर्कस्यैव संवित्तौ साक्षादुपायत्वं, नेतरेषाम् इत्युक्तं भवेत् ॥ १०५ ॥

न चैतत् निष्प्रमाणकमित्याह

उक्तं श्रीपूर्वशास्त्रे च
न द्वैतं नापि चाद्वयम् ।
लिङ्गपूजादिकं सर्व-
मित्युपक्रम्य शंभुना ॥१०६॥
विहितं सर्वमेवात्र
प्रतिषिद्धमथापि वा ।
प्राणायामादिकैरङ्गै-
र्योगाः स्युः कृत्रिमा यतः॥१०७॥

तत्तेनाकृतकस्यास्य
कलां नार्घन्ति षोडशीम् ।

श्रीपूर्वशास्त्र इत्युपक्रम्य शंभुनोक्तम्, इति संबन्धः 'न द्वैतं नापि चाद्वैतम्' इत्येवं-वृत्तानुरोधान्न पठितम्, 'लिङ्गपूजादिकं सर्वम्' इत्यत्रापि नञा संबन्धः, यदुक्तं तत्र

'..................... लिङ्गपूजादिकं न च ।'

इति । सर्वमित्यनेन लिङ्गपूजाद्यपरित्यागादेः स्वीकारः, यदुक्तं तत्र

'न चापि तत्परित्यागो निष्परिग्रहतापि वा ।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः ॥
तत्त्यागो वा व्रतादीनां चरणाचरणं च यत् ।
क्षेत्रादिसंप्रवेशश्च समयादिप्रपालनम् ॥
परलिङ्गस्वरूपादि नामगोत्रादिकं च यत् ।
नास्मिन्विधीयते किंचिन्न चापि प्रतिषिध्यते ॥'

इति । एवं हि तूष्णींभाव आपतेत्, इत्याशङ्क्य 'विहितम्' इत्याद्युक्तं, सर्वमिति विधीयमानं

पं० २ क० पु० नार्हन्ति इति पाठः ।

प्रतिषिध्यमानं च किंचिन्निषिद्ध्य, किंचिद्विधीयमानं हि भेदमेवाविर्भावयेत् तेन—संविदद्वैतशालिनो योगिनः कार्याकार्यविभागो नास्ति, इत्युक्तं स्यात्, अत एव प्राणायामाद्यङ्गकरणकतया कृत्रिमत्वात् स्वरससिद्धसंविदद्वयात्मनो योगस्य स्वल्पेनापि अंशेन दर्शनान्तरीया योगाः साम्यमात्रमप्यधिगन्तुं नोत्सहन्ते इत्युक्तं—प्राणायामादिकैरित्यादि ॥ १०७- ॥

ननु यद्येवं तत् अकृतकत्वेन निमित्तानपेक्षणादस्य नित्यं सत्त्वमसत्त्वं वा स्यात्? इत्याशङ्क्याह

किं त्वेतदत्र देवेशि
नियमेन विधीयते ॥ १०८ ॥
तत्त्वे चेतः स्थिरं कार्यं
तच्च यस्य यथास्त्विति ।

किं पुनरेतत् अत्र नियमेन विधातव्यं, यत्—

'तत्त्वे स्थिरं चेतः स्यात्' इति, चेतसोऽपि अत्र स्थैर्यमाकस्मिकमेव न स्यात्, इत्यत्र केनापि निमित्तेनावश्यं भाव्यम्, इत्याशङ्क्य उक्तं 'तच्च यस्य यथास्त्विति' तच्च–स्थिरं चेतो, यस्य कस्यचन योगिनो यथा नियतनिमित्तानपेक्षित्वेन स्यादित्यर्थः, यदुक्तं तत्र

'तच्च यस्य यथैव स्यात्स तथैव समाचरेत्।'

इति, अत एव नियमाभावात् सर्वमेव विहितं प्रतिषिद्धं चेत्युक्तम्। अष्टादशस्य पटलस्यैकवाक्यतां दर्शयितुमालूनविशीर्णतया अयं ग्रन्थः संवादितः ॥ १०८- ॥

तदेवोपसंहरति

एवं द्वैतपरामर्श-
नाशाय परमेश्वरः ॥ १०९ ॥
क्वचित्स्वभावममल-
मामृशन्ननिशं स्थितः।

ननु शुद्धसंविन्मात्रात्मैव पारमेश्वरः स्वभावो यस्य 'अहमेव सर्वम्' इत्येवं-रूपः परामर्शः, न च अस्य क्वचित् कदाचित् कश्चिद्विशेषः संभवेत् इति कथमुक्तं – क्वचिदमलं स्वभाव-मामृशन् स्थितः? इति, इत्याशङ्क्याह

यः स्वभावपरामर्श
इन्द्रियार्थाद्युपायतः ॥ ११० ॥
विनैव तन्मुखोऽन्यो वा
स्वातन्त्र्यात्तद्विकल्पनम् ।

इह खलु इन्द्रियार्थाद्युपायनैरपेक्ष्येण अन्त-रुल्लिखिताकारमात्रनिष्ठः, तन्मुखः – इन्द्रियार्था-द्युपायको निर्विकल्पपृष्ठभावी अन्यो वा यः स्व-भावपरामर्शः तदुभयरूपमपि क्षेत्रज्ञस्वातन्त्र्यो-ल्लासितं विकल्पनं विकल्प इत्यर्थः ॥ ११० ॥

तच्च द्विधा, इत्याह

तच्च स्वच्छस्वतन्त्रात्म-
रत्ननिर्भासिनि स्फुटम् ॥ १११ ॥

भावौघे भेदसंधात्
स्वात्मनो नैशमुच्यते ।
तदेव तु समस्तार्थ-
निर्भरात्मैकगोचरम् ॥ ११२ ॥
शुद्धविद्यात्मकं सर्व-
मेवेदमहमित्यलम् ।

तच्च – विकल्पनं, परानवभास्यत्वात् स्वच्छः, अत एवानन्यापेक्षत्वात् स्वतन्त्रो, योऽसावात्मा प्रमात्रेकरूपः परः प्रकाशः, स एव प्रतिबिम्ब-ग्रहणसहिष्णुत्वात् स्फटिकं, तत्राभेदेन निर्भासनशीलेऽपि प्रमातृप्रमेयात्मनि भावौघे, स्फुटं कृत्वा, स्वात्मनः सकाशादन्यापोहरूपत्वेन भेदसंधायकत्वात् नैशं – मायीयमुच्यते, इति सामान्येनोक्तेः सर्वैरेवाभिधीयते इत्यर्थः, तदेव विकल्पनं पुनः 'सर्वमिदमहमेव' इत्येवं-रूपम्, अत एव समस्तार्थपरिपूर्णस्वात्मैकनिष्ठम्, अत

एवालं—पर्याप्तं सत् शुद्धविद्यात्मकमुच्यते, इति प्राच्येन संबन्धः ॥ १११ ॥ ११२- ॥

ननु

'सर्वो विकल्पः संसारः .... ।'

इत्यादिनीत्या विकल्पस्तावत् सर्व एव हेयः, तदनेनापि विभागेनाभिहितेन कोऽर्थः? इत्याशङ्क्याह

इदं विकल्पनं शुद्ध-
विद्यारूपं स्फुटात्मकम् ॥११३॥
प्रतिहन्तीह मायीयं
विकल्पं भेदभावकम् ।

स्फुटात्मकमिति—प्रागुक्तविकल्पसंस्क्रियाक्रमणेन साक्षात्कारतां प्राप्तमित्यर्थः, मायीयस्य विकल्पस्य प्रतीघाते भेदभावकत्वं हेतुः, अत एवाभेदभावकत्वादिदमुपादेयम्, इत्युक्तं स्यात् ॥ ११३ ॥

तच्च परामृश्यभेदादनेकप्रकारम्, इत्याह

शुद्धविद्यापरामर्शो
यः स एव त्वनेकधा ॥११४॥
स्नानशुद्ध्यर्चनाहोम-
ध्यानजप्यादियोगतः ।

ननु अयं शुद्धविद्यात्मा परामर्शः कथं नाम भेदनिष्ठं मायीयमेव विकल्पं प्रतिहन्यात्, यत्प्रयोजकीकाराय अस्यापि प्रकारान्तरासूत्रणम्, इत्याशङ्क्याह

विश्वमेतत्स्वसंवित्ति-
रसनिर्भरितं रसात् ॥ ११५ ॥
आविश्य शुद्धो निखिलं
तर्पयेदध्वमण्डलम् ।

इह खलु एवंपरामर्शवान् योगी वक्ष्यमाणक्रमेण स्वात्मचमत्कारपूर्णतया आदरातिशयात्

विश्वमिदमाविश्य, अत एव परप्रमात्रेकरूपत्वात् शुद्धो निखिलमध्वमण्डलं तर्पयेत्—स्वात्मसंवित्तिरसनिर्भरतया साक्षात्कुर्यादित्यर्थः। अनेन च प्रतिनियतकल्पितबाह्यार्चनीयाद्यभावं कटाक्षयता योगाङ्गानुपयोगित्वानन्तर्येण उद्दिष्टस्य कल्पितार्चाद्यनादरस्य अवकाशो दत्तः ॥११५॥

ननु स्नानादेरपि भेदसंधायकत्वान्मायीयामर्शरूपत्वमेव युक्तं, तत् कथमस्य शुद्धविद्यापरामर्शकत्वमुक्तम्? इत्याशङ्क्याह

उल्लासिबोधहुतभु-
ग्दग्धविश्वेन्धनोदिते ॥११६॥
सितभस्मनि देहस्य
मज्जनं स्नानमुच्यते।

बाह्योन्मुखत्वादुल्लसनशीलः प्रमाणात्मा योऽसौ बोधः स एव प्रकाशत्वादग्निः, तेन दग्धं—स्वात्मसात्कृतं यन्नीलसुखादिरूपं विश्वं तदेव

दाह्यत्वादिन्धनं, तत उदिते – तदुभयसंघट्टनेन लब्धप्रतिष्ठाने, सिते – निरुपाधिनि, भस्मनि – अपरिमितप्रमात्रेकरूपे परे तत्त्वे, देहादेः – परिमितस्य प्रमातुर्यन्मज्जनं – स्वगुणीभावेन तत्रैव मुख्यतया समावेशः, तन्नाम स्नानमुच्यते, न पुनर्बाह्यजलादिरूपम्, इति अर्थसामर्थ्यलभ्यो व्यतिरेकः, यदभिप्रायेणैव

'यदि मुक्तिर्जलस्नानान्मत्स्यानां सा न किं भवेत् ।'

इत्यादि अन्यत्रोक्तम् ॥ ११६ ॥

ननु बाह्येन स्नानेन नित्यादौ कर्मण्यधिकारो देहादौ च शुद्धिर्भवेत्, अस्य पुनरेवं-विधस्य किं फलम्? इत्याशङ्क्याह

इत्थं च विहितस्नान-
स्तर्पितानन्तदेवतः ॥ ११७ ॥
ततोऽपि देहारम्भीणि
तत्त्वानि परिशोधयेत् ।

ननु

'सर्वं खल्विदं ब्रह्म'

इत्यादिनीत्या सर्वमिदं—देहादि परब्रह्मात्मकशिवस्वभावमेव, इति का नाम तत्र शुद्धिरशुद्धिर्वा? इत्याशङ्क्याह

शिवात्मकेष्वप्येतेषु
　　बुद्धिर्या व्यतिरेकिणी ॥ ११८ ॥
सैवाशुद्धिः पराख्याता
　　शुद्धिस्तद्धीविमर्दनम् ।

व्यतिरेकिणी—भेदात्मा, तद्धीः—व्यतिरेकिणी बुद्धिः, यदुक्तम्

'अशुद्धं नास्ति तत्किंचित्सर्वं तत्र व्यवस्थितम् ।
यत्तेन रहितं किंचिदशुद्धं तेन जायते ॥'

इति ॥ ११८- ॥

ततश्च किम्,—इत्याह

एवं स्वदेहं बोधैक-
पात्रं गलितभेदकम् ॥११९॥
पश्यन्संवित्तिमात्रत्वे
स्वतन्त्रे तिष्ठति प्रभुः ।

एवम्—उक्तेन प्रकारेण अनात्मन्यात्माभिमानन्यक्कारेण, आत्मनि स्वतन्त्रतादिधर्मप्रयोजकीकारेण, संविन्मात्ररूपतां साक्षात्कुर्यादित्यर्थः ॥ ११९- ॥

एवं स्नानादेरकल्पितत्वमभिधायेतरेषामपि अर्चनाङ्गानां दर्शयति

यत्किंचिन्मानसाह्लादि
यत्र क्वापीन्द्रियस्थितौ ॥१२०॥
योज्यते ब्रह्मसद्धाम्नि
पूजोपकरणं हि तत् ।

यस्यां कस्यांचिदिन्द्रियवृत्तौ, यत् किंचित्—अनियतं, मानसाह्लादि वस्तु, ब्रह्मरूपे शोभने सूर्याचन्द्रादिविलक्षणे तेजसि, योज्यते—बही-रूपतापरित्यागेन संविन्मात्रात्मना साक्षात्क्रियते, तन्नाम पूजोपकरणं—तावतैव पूजायाः परिपूर्तिर्भवेदित्यर्थः ॥ १२०- ॥

ननु अश्रुतपूर्वमिदं पूजालक्षणम्? इत्याशङ्क्याह

पूजा नाम विभिन्नस्य
भावौघस्यापि संगतिः ॥१२१॥
स्वतन्त्रविमलानन्त-
भैरवीयचिदात्मना ।

विभिन्नस्यापि रूपरसादेर्भावौघस्य, देशकालाद्यनवच्छिन्ननिरुपाधिपूर्णपरसंविदात्मना, या संगतिः—एकीकारः, सा पूजेति संभाव्यते—नैतदस्मदुपज्ञमेवेत्यर्थः, यदुक्तम्

'पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः ॥'

इति । एवं होमादीनामपि पूजोपकरणत्वादेव ईदृक् रूपमर्थसिद्धम्, इति न साक्षादुक्तम्, तच्च प्राक् बहूक्तं, वक्ष्यते च, इति – तत एवावधार्यम् ॥ १२१ ॥

ननु कथमन्यस्य अन्येनैकीकार एव भवेत् यदपि पूजादेर्लक्षणतयोच्येत ? इत्यशङ्क्याह

तथाहि संविदेवेय-
मन्तर्बाह्योभयात्मना ॥१२२॥
स्वातन्त्र्याद्वर्तमानैव
परामर्शस्वरूपिणी ।

इयम् – उक्तस्वरूपा, संविदेव हि स्वस्वातन्त्र्यादन्तर्बहीरूपतया परिस्फुरति, इति – तदतिरिक्तमन्यत् नाम न किंचिद्वस्तुतोऽस्ति, इति युक्तमुक्तं – 'विभिन्नस्यापि भावौघस्य चिदात्मनैकीकार' इति, ननु कथं नामास्या बहीरू-

पतावभासनेऽपि अहंपरामर्शात्मकं स्वं रूपं स्यात्? इत्याशङ्क्योक्तं 'परामर्शस्वरूपिण्येव' इति, एवमप्यस्या न स्वरूपात्प्रच्याव इत्यर्थः ॥ १२२ ॥

इयदेव हि नामास्याः परामर्शरूपत्वं — यद्विश्वरूपतया प्रस्फुरति, इत्यत आह

स च द्वादशधा तत्र
　सर्वमन्तर्भवेद्यतः ॥ १२३ ॥
सूर्य एव हि सोमात्मा
　स च विश्वमयः स्थितः ।
कलाद्वादशकात्मैव
　तत्संवित्परमार्थतः ॥ १२४ ॥

सः — परप्रमातृरूपः परामर्शश्च द्वादशधा विश्वरूपतयोल्लसेदित्यर्थः, अनेन कल्पितार्चाद्यनादरानन्तर्येण अनुजोद्देशोद्दिष्टः संविच्चक्रोदयोऽप्युपक्रान्तः । ननु विश्वस्य प्रमातृप्रमेयादिरूपत्वेनापि बहुधात्वमस्ति, इति कथं — द्वादशक-

लात्मसूर्यरूपेण प्रमाणमात्रेणैवोपात्तेन तत्संग्रहः सिद्ध्येत्? इत्याशङ्क्याह 'तत्रेत्यादि' सर्वमिति – प्रमातृप्रमेयादि, इह खलु

'योऽयं वह्निः परं तत्त्वं प्रमातुरिदमेव तत् ।'

इत्याद्युक्त्या परसंविदात्मा प्रमाता तावत् भेदेन्धनदाहकत्वादग्निः, स एव च अहंप्रतीतिमात्रस्वरूपः स्वस्वातन्त्र्यात् बुद्धीन्द्रियाद्यात्मना द्वादशधा प्रस्फुरन् प्रमाणदशामधिशयानः 'सूर्य' इत्युच्यते, प्रमाणं च प्रमातुरेव बहिर्मुखं रूपम्, इति–तत्र प्रमाता तावदन्तर्भावमियात्, प्रमाणं नाम च ज्ञानं, तच्चोपाश्रयशून्यं न क्वचिदपि संभवति – इत्यवश्यमेव मेयाक्षेपेण वर्तते, इति, तदपि अत्रान्तर्भूतमेव, तदाह 'सूर्य एव' इत्यादि, 'सोमः' प्रमेयम्, यदुक्तं प्राक्

'सूर्यं प्रमाणमित्याहुः सोमं मेयं प्रचक्षते ।
अन्योन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ ॥'

इति । विश्वमय इति विश्वस्य मेयात्मकत्वात्,

अतश्च सर्वस्यैव अत्रान्तर्भावात् विश्वरूपतया प्रस्फुरन्त्याः परस्याः संविदो द्वादशात्मकत्वमेव वस्तुतः संभवति, इति युक्तमुक्तं 'स च द्वादशधा इति, अत एवाह 'कलाद्वादशकेत्यादि' कलाः – प्रमात्रादिरूपाः अंशाः ॥१२३॥१२४॥

ननु अस्यास्त्रयोदशात्मकत्वमपि अन्यैरुक्तं, त् कथमिह द्वादशात्मकत्वमेवोच्यते? इत्याशङ्क्याह

सा च मातरि विज्ञाने
माने करणगोचरे।
मेये चतुर्विधं भाति
रूपमाश्रित्य सर्वदा ॥ १२५ ॥

विज्ञाने इति मानविशेषणम्, अन्येषां हि धाबोधरूपमपि प्रमाणलक्षणं विवक्षितं, करोचरे इति – प्रमाणविषयतां प्राप्ते इत्यर्थ या हि मेयं नाम स्वात्मनि न किंि त भावः, चो हेतौ, यतः, सा – पारम

संवित् सृष्टिस्थितिसंहारानाख्यत्वेन चतुर्विधं रूपमाश्रित्य प्रमातरि प्रमाणे प्रमेये च सर्वदा भाति – अविच्छिन्नत्वेन एकैकत्र चातुरात्म्येन द्वादशधा प्रस्फुरतीत्यर्थः, यदुक्तम्

'सोमार्कानलदीप्तीनां रूपं यः सर्वगोऽमितः ।
सृष्ट्यादिक्रमयोगेन व्यक्ततां नयति स्फुटम् ॥'

इति । तथा

'यस्यां यस्यां बोधभूमौ समाविशति तत्त्ववित् ।
तस्यां तन्मयतां प्राप्य चातुरात्म्यं प्रपद्यते ॥'

इति । ननु अस्या परस्याः संविदोऽन्यैरन
भङ्ग्या त्रयोदशात्मकत्वमुक्तम्, यदुक्तम्

'एकं स्वरूपरूपं हि मानमेयप्रमातृताः ।
सर्गावतारसंहारमयीराक्रम्य वर्तते ॥
स्वस्वरूपानुगुण्येन प्रत्येकं कलनावशात् ।
सृष्टिस्थित्यादिभिर्भेदैश्चतुर्धा ता अपि स्थिताः ॥
कालग्रासान्तमुदयाच्चतुर्धा विभवो हि यः ।
तस्य विश्रान्तिरेकैव ततो देव्यस्त्रयोदश ॥
नाख्यचक्रे प्राधान्यात्पूजनीयतया स्थिताः ।'